श्रीशबरीविलासम्

साहित्यालङ्कारः कविभूषणं
श्रीनागराजः

Samskrit Lyric

"When the cry is heard from every platform that Samskrit is a dead language, it is really heartening to see our living poets like Pandita Kshama Bai in Bombay, Sri K. S. Nagarajan in Mysore (whose Kavyas were recently reivewed in these columns) and our Madras State Poet Laureate accepting the challenge boldly and writing Kavyas which are almost similar in style and content to the best poems in our ancient literature. These poets prove abundantly, if proof were necessary, that Samskrit besides being a rich power-house feeding all our North and South Indian languages, not only in respect of vocabulary but also in translations or adaptations, can itself be adapted and even adopted to suit the modern conditions of a state language, as it once was under Kanishka, Sri Harsha, Bhoja and other kings of revered memory."

(Sd.) VENKATAKRISHNA RAO, M.A.,

(*Extract from the Indian Express.*)

श्रीसीतास्वयम्वरम्

Seethaswayamvaram

(A Mahakavya in 16 Cantos)

Makes delightful reading

(Review by *The Indian Express of 14th January 1950*)

As Nilakantha Dikshita has observed, it is very rare that we find enlightened poetic genius not indulging in an exaggerated poetic style full of conceits or shabdachitra and it is very pleasing to note that Sri Nagarajan has written a Mahakavya conforming faithfully and fully to all the rules laid down by Sanskrit Alamkarikas, almost coming up to the level

(*Contd. at the end*)

श्रीः

॥ श्रीशबरीविलासम् ॥

SRI SABARI VILASAM

with a foreword

BY

Vidya Vibhushana

SRI M. P. L. SASTRY, M.A.,

MEMBER,

University Council and Senate, Faculty of Science, Board for Sanskrit Education and Examinations in Mysore

BY

Sahityalankara Kavibhushana

SRI K. S. NAGARAJAN, B. Sc.,

(*Supt. A. G.'s Office, Bangalore*)

Author of Stothramuktaphalam, Sri Seethaswayamvaram, Bharateeya Desa bhaktacharitam, Unmattakee Chakam etc.

AWARDED SUBVENTION BY THE UNIVERSITY OF MYSORE IN A. 4-147/49-50 DATED 18TH MAY 1951.

PRINTED BY V. B. SOOBBIAH & SONS,

BANGALORE–2

1952

Price Rs. 1–4–0] [मूल्यम् १–४–०

|| सर्वे अधिकाराः ||
|| ग्रन्थकर्त्रैव स्वायत्तीकृताः ||

All Rights Reserved

First Edition 1000 Copies.

विषयानुक्रमः

क्रमसंख्या	विषयः	पृष्ठसंख्या
१.	Foreword	i
२.	विज्ञापना	iii—v
३.	नारदागमनम्	१—११
४.	द्यूतारम्भः	१२—२२
५.	शिवपराजयः	२३—४७
६.	पार्वतीविरहः	४८—६८
७.	शिवसमागमः	६९—८०
८.	शबरीविजयः	८१—९३
९.	उपसंहारः	९४
१०.	श्रीविशालाक्षीस्तवः	९५-१००
११.	श्रीगङ्गायमुनयोः स्तुतिः	१०१-१०८
१२.	Errata	१०९

VIDYAVIBHUSHANA
SRI M. P. L. SASTRY, M.A.,
MEMBER :
University Council & Senate,
Faculty of Science, Board for
Sanskrit Education & Examinations
in Mysore

P. O. MALLESWARAM,
BANGALORE-3

FOREWORD

It is indeed a very rare privilege to have an opportunity to write a Foreword to a Sanskrit poem of the type of "Sabarivilasam", written by Sahityalankara Sri. K. S. Nagarajan. Sri. Nagarajan is well known to the Sanskrit world by his several gifted works, both in prose and poetry. He deserves congratulations on the production of yet another interesting poem, "Sabarivilasam".

The poem is modelled on the ancient Mahakavyas written in simple, beautiful style with varied metres. It makes a lively reading, reminding us of the poets like Aswaghosha and Kalidasa. The poem bears the true mark of a true poet, giving ample testimony to his wonderful command over the language and its niceties. One feels proud and delighted that there are still poets of this ability.

Sabarivilasam has enriched the sanskrit language and found a place for Sri. Nagarajan, its author, in the history of Sanskrit literature.

It is with the greatest pleasure that I introduce this poem which is excellent both in form and content to the Sanskrit public, and express the hope that thousands will enjoy the sweetness of the poem.

Date 6th March 52.

S/d. **M. P. L. Sastry.**

सरस्वती श्रुतिमहती महीयताम् ।
सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहः किञ्चिद् वीणाधरमुपास्महे ॥

प्रतिष्ठा -- पत्रम् ।

श्रीमान् पण्डित के.एस्. नागराजन् स्थानम् बेङ्गलोरः, महीसुरपुरराज्यम्

अविद्यान्धं तमो निरस्यन्ती विद्या ज्ञानञ्जनयति । परमाभ्युदय-साधकं तस्याः स्वरूपं सतीष्वपि विविधासु विद्यासु भूतभव्यवर्तमानो-दयनिदानत्वाद्विद्यान्तरापेक्षयोत्कृष्टतमां संस्कृतवाणीमेवाधिकृत्य जगति प्राकाशयत । साम्प्रतञ्जगद्गुरुत्वेनाभिमते भारते जगन्मङ्गलायास्याः प्रचुरप्रचार आवश्यकः । स च संस्कृताध्यापनाध्ययनाभिभाषणपत्र-प्रचारसरलोत्कृष्टग्रन्थलेखनगौरवप्रकाशनसम्मानवितरणोत्साहवर्धनादि-भिः सम्भाव्यते । एतत्कार्यसम्पादनार्थैव संस्कृतकार्यालयः समजनि ।

सुरसरस्वत्याः कृपाकटाक्षास्पदीभूता ये केचिद्विद्वद्धार्मिकाभिभाव-कास्तेऽस्य कार्यालयस्य प्रेमपात्राणीति तत्रभवतो भवतः संस्कृतसंरक्षण-कराणि कर्माणि दिवानिशं मुहुर्मुहुरालोचयन्नपि निःस्वतया वसुलत्वेनापि सत्कर्तुमप्रभुर्महाप्रतिष्ठोपनिषदुत्कृष्टसदुपाधिप्रदानमात्रेणैवोपचरितुकामः साम्प्रतं साहित्यिकयोग्यतया प्रसन्नः संस्कृतकार्यालयो भवन्तं **साहित्यालङ्कार** उपाधिनालंकृत्य परमानन्दमाप्नोति, तथा सर्वश-क्तिमत्या महाकाल्याश्चरणकमलयोः सविनयं प्रार्थयते यद्भावत्की परा सांस्कृतसमुन्नतिर्भूयादिति शम् । संस्कृतकार्यालयस्य च—

प्रवन्धकः - संस्कृतप्राणः विद्यारत्नम् सुरभारतीशेखरः । मङ्गलाकांक्षी -

श्रीस्वामियोगेश्वरानन्दतीर्थः

संस्कृतम्—सम्पादकः
संस्कृत — कार्यालयः, अयोध्या
विजयदशम्यां २००३ विक्रमाब्दे

श्रीः

यस्यास्त्रैलोक्यमातुश्चरणकमलयोर्दिव्यधूलीकणानां
संपर्कात्पूर्तिमागाद्रसभरितमिदं खण्डकाव्यं मनोज्ञम् ।

कल्याणीं तां दयार्द्रां त्रिनयनदयितां देवदेवादिवन्द्यां
वन्दे बालार्कवर्णां विषयविषहरां कामदात्रीं विधात्रीम् ॥

यत्कृपालवसम्पर्कात्स्फुरन्ति सकलाः कलाः।
नमामि तं कृपासिन्धुं जगद्गुरुमहर्निशम् ॥

श्रीः

॥ विज्ञापना ॥

गैर्वाणीवाण्यां सुलभरीत्या विरचितस्य श्रीसीतास्वयंवराख्यस्य षोडशसर्गात्मकस्य नूतनमहाकाव्यस्य समग्रे भरतवर्षेऽप्यभूतपूर्वमनिरीक्षितं स्वागतं बुधजनैः साधुजनैर्विविधविधानैर्दत्तमिति वक्तुं त्वरतेतरामयं जनः सप्रश्रयम् । तेभ्यः सर्वेभ्यः पुनः पुनः कृतज्ञतां समर्प्येत्थं साञ्जलिरधुना निवेदयति । श्रीशबरीविलासं नामापरं खण्डकाव्यं षट् सर्गात्मकं नवीनं रसनिर्भरं पण्डितानां सहृदयानां सदयानां सज्जनानां पुरस्सविनयं निवेश्यते । सुभाषितोक्तरीत्या —

> 'असारे खलु संसारे द्वे फले ह्यमृतोपमे ।
> नित्यं काव्यरसास्वादः सङ्गमः सज्जनैस्सह ॥'

सर्वे गीर्वाणभाषाभिमानिनश्चेतरे जनाः काव्यरसं यथेच्छमास्वाद्यानन्दन्तीति विद्यते दृढो विश्वासः ।

अस्मिन् काव्ये निरूपिता शबरी न रामायणशबरी ; परन्तु स्कान्दपुराणशबरी । रसमयं कथावस्तु स्कान्दपुराणादुद्धृतम् । अविहाय पुराणपद्धतिमधिकृत्याधुनिकविषयान्विरचितमिदं काव्यममृतवाण्यां केवलं सज्जनानां मुदे । सर्वत्र दृश्यते सर्वासां भाषणां सर्वतोमुखी वृद्धिः । संस्कृतभाषायां नवीनकाव्यसृष्टिमनालोक्य सर्वासां भाषाणां मातृभूतायाः सुरवाण्या दुरवस्थां समीक्ष्य प्रभूतं दूयमानमानसेनामुना जनेन नवीनसाहित्यरचने यः कश्चित्प्रयत्नः कृतः । यद्यनेन गैर्वाणी वाणी पुनरपि धवलकीर्तिमधिगत्य भरतवर्षमखिलं सत्पथे [illegible] प्रयत्नोऽयं सफलः [illegible]शास्तेऽयं जनः ।

स्वतन्त्रे भारते सुरभारती अग्रस्थानमेव गमयितव्या। यतस्तस्यामेवास्माकं संस्कृतिसर्वस्वं निगूढम्। सैव राष्ट्रभाषा भवितुमर्हतीति निस्संदेहं वक्तुमुत्सहते चेतः। यावद्भवति सा सर्वत्र लोकेऽस्मिन् पुनरपि जनप्रिया तावदेव राष्ट्रमस्माकं विद्योततेतरां दिक्षु विदिक्षु प्रसरत्कीर्तिकौमुदीम्।

निखिलब्रह्माण्डनायकस्य दयामयस्य भगवतः कृपारस एव प्रभूतं काव्यरूपेण प्रवहति। अव्याजकारुण्यमूर्तेर्दिव्यचरणारविन्दयुगलं हृदयस्थं सर्वाभीष्टफलप्रदं भक्त्या प्रणम्य, आराध्य संस्कृतवाणीप्रेममूलं प्रत्यक्षदैवतं पित्रोर्दिव्यपदाम्भोजयुग्मं सम्यगारब्धमिदं काव्यमद्यैव सम्पूर्णम्। अस्य मुद्रणार्थं परमकारुण्येन मुद्रणव्ययस्यार्धं परिमितं कृपाधनं वितीर्णवतां श्रीमहीशूरविश्वविद्यालयाधिकारिणां प्रथमतस्सविनयं कृतज्ञता समर्प्यते। मदीयां याचनामनुमान्य सादरं सप्रमोदं चास्य काव्यस्याशीर्वचनमनुगृहीतवतां श्रीमतां महीशूरविश्वविद्यालयीयसभासदस्यानां, महीशूरदेशीय संस्कृताध्ययनपरीक्षणकेन्द्रसभासदस्यानां, संस्कृतविद्यावारिधीनां, संस्कृतवाणीपुनरुज्जीवनक्रियाकलापे बद्धकङ्कणानां, अस्मन्मित्रवर्याणां, महामहिम्नां, मान्यानां विद्याविभूषण श्री. एम्. पि. एल्. शास्त्री. एम्. ए. महोदयानां च प्रणतिपूर्वमाधमर्ण्यं निवेदयितुं त्वरते मे मनः। काव्यस्यास्य मुद्रणवेलायामशुद्धपत्रिकाशोधनेन सर्वदा सर्वकालेषु श्रममविगणय्य ममामूल्यसाहाय्यं हसन्मुखारविन्देनैव समाचरितवतां, सुहृद्वर्याणां, कल्याणपुरी सैन्यकटकस्थ सैण्ट् जोसेफ् कलाशाला संस्कृताचार्याणां भारतीयभाषाप्रधानाचार्याणां विद्याभास्करेत्यादि बिरुदाङ्कितानां विद्वान्. एम्. रामकृष्णभट्ट एम्. ए.-महाशयानां महाविदुषामतीव कृतज्ञोऽस्मि। एवमेव परमोत्साहेन काव्यस्यास्य मुद्रणं रमणीयरीत्या कृतवतां कल्याणपुरीस्थ (बेङ्गलूर) श्री.वे. बि. सुब्बय्य अण्ड् सन्स् अभिधानामपि अवश्यं कृतज्ञता सम-

र्प्यते । काव्यस्यास्य प्रकाशने ये ये महानुभावाः यथाशक्ति स्वसाहाय्यमाचरन् तेषां सर्वेषां सविनयं बद्धोऽञ्जलिरयम् ।

प्रमादवशादत्र दोषाः कतिचित्सम्भवेयुः यत्सहजः खलु मानुष्यकोऽपराधः । औदार्यगुणभूयिष्ठैः सज्जनैस्ते सर्वे कृपया क्षन्तव्याः । कृपा पूर्ववत्संरक्षणीया । अपारः खलु संस्कृतस्य विस्तारः । अनभिज्ञोऽयं जनः । यद्यनेन प्रयत्नेन ईषदपि गैर्वाणीवाणी जनप्रिया स्याद्धन्योऽस्मीति साञ्जलिबन्धं विज्ञापयामि ।

इति,
सज्जनविधेयः,
नागराजः

कल्याणपुरी (बेङ्गलूरु)
नन्दन संवत्सर चैत्र
शुद्ध दशमी भृगुवासरः
४—४—१९५२.

श्रीः

॥ श्रीगणेशाय नमः ॥

॥ विघ्नेशस्तुतिः ॥

नमामि नव्ये कविताप्रसङ्गे
गौरीगिरीशप्रणयाभिपूर्णे ।
विघ्नेश्वरं विघ्नविनाशनार्थं
पिनाकपाणिप्रियपुत्रमादौ ॥

॥ शारदास्तुतिः ॥

या वीणोद्भवदिव्यगीततितिभिर्मन्दस्मितैश्चानिशं
विश्वं विस्मयपूर्णमेव तनुते देवी दयावारिधिः ।
यामाश्रित्य जयन्ति भूरिकवयः सर्वत्र वागीश्वरीं
तां वन्दे जननीं समस्तजगतां गीर्वाणवाणीखनिम् ॥

महाकविहृदम्भोजहंसीं हंसरथप्रियाम् ।
हंसाभां हंससंसेव्यां वाग्देवीं प्रणमाम्यहम् ॥

॥ महर्षिस्तुतिः ॥

सत्यप्रतिष्ठाः परिशुद्धचित्ता महर्षयो ये परिपूर्णकामाः ।
महोदयेभ्यो वितरामि तेभ्यः पुराणकृद्भ्यः पुरतो नमांसि ॥

इदं कथावस्तु समुद्धृतं नु स्कान्दाभिधानाल्ललितं पुराणात् ।
नवीनरीत्या रचितं रसाढ्यं प्रपठ्य नन्दन्तु जनास्समस्ताः ॥

॥ कविकाव्यप्रशंसा ॥

कालिदासरचितां कमनीयां काव्यपङ्क्तिमवलोक्य रसज्ञः ।
मानवः क इह नो कवितायां श्रद्दधाति परमादरपूर्णः ॥

पावनी गुणमयी सुरवाणी सा तथा रसमयी कविता नु ।
यः करोति कवितां सुरवाण्यां तस्य जन्म न पुनर्भवतीह ॥

प्रीतिदं भूरि शबरीविलासं पार्वतीपतेः ।
रचितं रससंपूर्णं सर्वे नन्दन्तु सज्जनाः ॥

॥ राजाशीर्वादः ॥

महिषपुरवरश्रीहेतुरुद्दण्डकीर्ति-
र्जयतु बुधजनानामाश्रयो धर्मनिष्ठः ।
जयतु नरवरेण्यः सज्जनानां शरण्य-
स्स जयतु जयपूर्वश्चामराजेन्द्रभूपः ॥

ॐ

॥ श्रीद्वारकाधीशो विजयते ॥

॥ श्रीशारदाम्बाचन्द्रमौलीश्वरौ विजयेतेतराम् ॥

॥ श्रीद्वारकाशारदापीठम् ॥

॥ पदवी प्रदान पत्रम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्य पदवाक्यप्रमाण पारावारपारीण यमनियमासनप्राणायामप्रत्याहार ध्यानधारणासमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ तपश्चर्याचरणचक्रवर्ति अनाद्यविच्छिन्नगुरुपरम्पराप्राप्त षण्मतस्थापनाचार्य सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्र निखिलनिगमागमसारहृदय श्रीमत्सुधन्वसाम्राज्यप्रतिष्ठापनाचर्य व्याख्यानसिंहासनाधीश्वर श्रीमद्राजाधिराजगुरुभूमण्डलाचर्य चातुर्वर्ण्यशिक्षक गोमतीतीरवासि श्रीपश्चिमाम्नाय श्रीद्वारकाशारदापीठाधीश्वर श्रीमज्जगद्गुरुशङ्कराचार्य

श्रीअभिनवसच्चिदानन्दतीर्थस्वामिभिः

अत्यन्त प्रियशिष्य — के. एस्. नागराजन् — एतान्——

———————————————————— प्रति

प्रत्यग्ब्रह्मैक्यानुसंधानसमन्वित श्रीनारायणस्मरणसंसूचिताशिषः समुल्लसन्तुतराम् ॥ श्रीजगद्गुरूणां महेश्वरापरावतार श्रीमच्छङ्करभगवत्पूज्यपादाचार्याणां श्रीशारदापीठगोचरा भक्तिरनवधिकश्रेयोनिदानमिति सार्वजनीनमेतत् ॥ साम्प्रतम्

यस्य स्मरणमात्रेण सिध्यन्ति सकलाः क्रियाः ।
तं वन्दे द्वारकावासं गुरुवर्यं निरन्तरम् ॥

VIDYAVIBHUSHANA

SRI. M. P. L. SASTRY, M.A.,

Member:

UNIVERSITY COUNCIL & SENATE, FACULTY OF SCIENCE, BOARD FOR SANSKRIT EDUCATION AND EXAMINATIONS IN MYSORE

स्वधर्ममर्यादासंरक्षणे बद्धपरिकराणां भवतां— श्रीसीतास्वयंवरादिकाव्यप्रागल्भ्यं आलोक्य प्रमुदितान्तःकरणा वयं भवद्भ्यः

क वि भू ष ण म्

इति सत्पदवीं सम्प्रयच्छामः । इदं च श्रीद्वारकाधीशशारदाम्बाचन्द्रमौलीश्वरप्रसादरूपं सत्पदं सुवर्णं रत्नमिव स्वनाम्ना संयोजितं भवद्भिर्यत्नेन संरक्षणीयमिति शिवम् ।

श्रीमच्छङ्कराचार्याणां
अवतारशकाब्दाः— २४३०
विक्रमशकाब्दाः— २००७

श्रीः

ता. २७-१०-५०, कार्तिक. कृ. तृतीयायाम्.
क्रमाङ्कः— ११४

श्रीमज्जगद्गुरुशङ्कराचार्याः

स्वारीमुक्काम— वीरमगाम



विप्रान्वये विश्वगुणाभिदीप्ते
जातं सदाचाररतं मदीयम् ।
विद्यागुरुं वैद्यवरं च भक्त्या
शेषाभिधानं पितरं नमामि ॥

आ शैशवाद्या मयि दिव्यवाणी-
प्रेमाङ्कुरं प्रीतिरसैरपुष्यत् ।
नागाम्बिकां प्रेममयीं प्रसूं मे
वन्दे च तां भक्तिनतोत्तमाङ्गः ॥

॥ श्रीः ॥

॥ श्रीशबरीविलासम् ॥

॥ प्रथमस्सर्गः ॥

॥ नारदागमनम् ॥

अस्ति प्रशस्तः किल कामरूपः कैलासशैलः कमनीयशोभः ।
कैवल्यमुद्राङ्कितसानुदेशः कल्याणदानप्रथितात्मकीर्तिः ॥१॥

चिरन्तनश्चन्द्रमरीचिशुभ्रश्चराचरात्मा चरितार्हभूमा ।
चित्रावलीसंवृतचित्रभित्तिश्चकास्ति चैकादशरुद्रवासः ॥२॥

यस्मिन् हरो हैमवतीसमेतो हिमांशुसंदीपितयामिनीषु ।
कालं नयत्येकमुहूर्तकल्पं कल्पान्तरुद्रोऽपि हसन्महान्तम् ॥३॥

स्थित्वा स्थिरो यत्र सिताद्रिशृङ्गे विहङ्गदृष्ट्या प्रसमीक्ष्य तुङ्गे ।
लोकं समस्तं च सुखानि भूयो नृणां ददातीव हि कल्पवृक्षः ॥४॥

बिम्बाधरा यत्र गिरीन्द्रकन्या बिम्बानि नानाविधरूपभाञ्जि ।
अवाङ्मुखान्यूर्ध्वमुखानि दृष्ट्वा ह्रस्वाणि दीर्घाणि समेति हर्षम् ॥५

सूर्यांशुतप्तो रजताद्रिराजो विराजते विश्वजनाभिवन्द्यः ।
महातरङ्गोल्लसितात्मकायो यथा पयोधिः किल शुभ्रवर्णः ॥६॥

बालार्कवत्प्रातरतीव रम्यो द्रवीभवन् सूर्यकराभितप्तः ।
ततो दिनान्ते पुनरेव शान्तो विभाति मूर्तित्रयरूपधारी ॥७॥

सिताम्बुदाभो रजताद्रिशृङ्गे सदा वसन् चन्द्रकलावतंसः ।
कृपारसं वर्षति जीवराशौ नित्यं निरातङ्कसुखप्रदाता ॥८॥

गन्धर्वविद्याधरमानिनीनां सप्तस्वराणां श्रुतिमञ्जुलानाम् ।
अधित्यकासु क्षितिभृद्वरस्य प्रतिध्वनिः प्रादुरुदेति रम्यः ॥९॥

वृक्षादिभिर्हीनगिरौ तदीये महर्षयो ध्यानरतास्तु वृक्षाः ।
लता लताङ्ग्यः कुसुमं तदीयं मुखारविन्दं च कुचाः फलानि॥१०॥

नतोन्नतप्रस्थभुवि प्रभूता सङ्क्रान्तसूर्यांशुसहस्रपङ्क्तिः ।
नैजानि च प्रामकबिम्बकानि प्रभस्य चित्राणि सृजत्यनन्ता॥११

श्रीकण्ठमौलिस्थसुधांशुरेखासमुद्गता मञ्जुलचन्द्रिका सा ।
करोति यत्रासितपक्षनाशं सतां मुदे श्वेतगिरौ सदा वा ॥१२॥

चन्द्रातपस्निग्धमनोहराङ्ग्यश्चन्द्रातपेषु क्षणदासु नित्यम् ।
प्रियैः सह प्रीतिभरालसान्ताः कालं नयन्ति क्षितिभृद्वरेण्ये ॥१३

मन्दाकिनीशुभ्रजलेऽवगाह्य प्रातस्त्रिपुण्ड्राश्चितभालदेशाः ।
गणा घटान् यत्र जलैः प्रपूर्य प्रभुं सदार्चन्ति शिवं हि साक्षात्॥१४

यत्रान्धकारः शतकोटिभासं सदा शिवं वीक्ष्य विधान्तितः स्यात् ।
अतो तमिस्रास्वपि नैव शैले तमश्च किंचिद्भवतीति सिद्धम्॥१५॥

स्मरेषुतप्ताः सुमकोमलाङ्ग्यः स्मेराननाः कान्तकराभिदीप्ताः ।
स्मरान्तके तिष्ठति शैलशृङ्गे स्मरं स्मरन्तीति विचित्रमेतत् ॥१६॥

कामेश्वरः कामहरोऽपि यस्मिन् रागान्तकः शैलसुतानुरक्तः ।
विरागिणां प्राग्रहरो महीयान्महीयते सर्वमहामहिम्ना ॥१७॥

सदा शिवेति प्रमथा वदन्तो नृत्यन्ति सन्तः समये प्रदोषे ।
सत्यां भवान्यां मणिदीप्तपीठे भवेऽपि नाट्यक्रिययाभियुक्ते ॥१८

यत्र प्रदोषे प्रमथाधिपेन प्रवर्तिता नाट्यकला मनोज्ञा ।
प्रतिश्रुता राजतकन्दरेषु प्रजृम्भते प्रत्यहमश्चितास्या ॥१९॥

अथैकदाद्रौ शशिखण्डमौलिं द्रष्टुं समायात्सुरसन्नुताङ्घ्रिः ।
त्रिलोकसञ्चाररतो महात्मा विष्णुप्रियो यः किल नारदाख्यः॥२०

पदे पदे देवमुनिर्मनोज्ञं नारायणाख्यं पदमागृणानः ।
नवीनवीणाञ्चितपाणियुग्मो गानामृतापानमदाभिपूर्णः ॥२१॥

झणत्क्वणन्नूपुरमण्डिताङ्घ्रिस्तन्त्रीनिविष्टाङ्गुलिपञ्चकश्च ।
मुकुन्दमुक्तावलिदीप्तवक्षा हसन्मुखाब्जः परमात्मरूपः ॥२२॥

सदा चिदानन्दमयो महर्षिर्ब्रह्मात्मजो ब्रह्मविदां पुरोगः ।
निरञ्जनो ध्याननिमीलिताक्षः सिताक्षमालाञ्चितसव्यपाणिः ॥

जटाकिरीटी जनकः कलीनां जितेन्द्रियो जन्मलयातिरिक्तः ।
ज्ञानी तपःसत्यनिविष्टबुद्धिश्चिन्ताविहीनो निगमान्तवेद्यः॥२४॥

यज्ञोपवीती महतीसमेतः समेधमानः प्रभया महत्या ।
समानदृष्टिः सकलेषु लोके मतां प्रियः सज्जनपूजनीयः ॥२५॥

विमोहयन् गानसुधाभिवृष्ट्या कैलासशैलस्थगणान् समस्तान् ।
तथापि गौरीसहितं महेशं नृत्यक्रियासक्तमपि क्षणेन ॥२६॥

समागतं देवमुनिं समीक्ष्य प्रभुः समुत्थाय महेश्वरोऽपि ।
ददौ सपर्यां गिरिजासहायः पूजास्समस्ता विधिवत्समर्प्य ॥२७॥

रत्नाञ्चिते पीठवरे निविष्टं महामुनीन्द्रं मुनिसन्नुताङ्घ्रिः ।
जगाद वाक्यं परमार्थयुक्तं फणामणिद्योतितदेहकान्तिः ॥२८॥

अतर्कितं देवमुने त्वदीयं समागमं वीक्ष्य समुत्सुकोऽस्मि ।
विज्ञातुमिच्छाम्यखिलं निदानं प्रसीद सर्वं वद मूलतो मे ॥२९॥

त्वदाननाब्जामृतबिन्दुसिक्तैर्मनोहरैर्मङ्गलकारकैश्च ।
नूनं हि नारायणशब्दघोषैरानन्दितश्रोत्रपुटद्वयोऽस्मि ॥३०॥

त्वत्पाणिवीणाप्रभवैर्महद्भिर्भव्यैर्भवानीसुखकारणैश्च ।
मुहुर्मुहुर्लब्धमनःप्रमोदो निमीलिताक्षित्रय एव जातः ॥३१॥

कच्चिन्मुने शोकविहीनमस्ति त्रैलोक्यमद्धा सचराचरं नु ।
त्रिलोकसंचाररतो यतस्त्वमाख्याहि सर्वं मुनिनाथ मह्यम् ॥३२॥

लोकावनाख्ये कटुकर्मणीह त्वत्सन्निभा भक्तिपराः प्रमाणम् ।
भक्ताग्रगण्यः खलु तापसेन्द्र सत्यप्रतिष्ठोऽसि च धर्मयुक्तः ॥३३॥

प्रचोदितश्चेत्थमथेश्वरेण प्रचक्रमे वक्तुमुदन्तमेवम् ।
महेश्वरेणाप्युदितप्रशस्त्या प्रह्वोत्तमाङ्गः स तपोधनाग्र्यः ॥३४॥

अगोचरं देव दयानिधे ते चराचरेष्वस्ति न किञ्चिदत्र ।
तथापि यद्दृष्टमहं यथार्थं वदामि लोकैकविभो प्रसीद ॥३५॥

लोकान् दिदृक्षुः प्रथमं समस्तान् परिभ्रमन् स्वर्गमगच्छमीश ।
शतक्रतुं वीक्ष्य शचीसमेतं सुखे वसन्तं त्रपमप्रपञ्चम् ॥३६॥
गतस्तमापृच्छ्य सहस्रभानुं शीतांशुमुद्वीक्षितुमुद्यतोऽहम् ।
अपूजयत् साधु सपर्यया मां प्रसन्नवक्त्राम्बुजदिव्यशोभः॥३७॥
मदीयपादाब्जयुगं स्वशीर्षे धृत्वानुयुक्तश्च मया स्वकीयाम् ।
कथां यथाभूतमथाचचक्षे स्वक्षेमलाभप्रभवां हिमांशुः ॥३८॥
सुरार्चित स्वागतमस्तु तेऽद्य सर्वं यथापूर्वमिहास्ति देव ।
परन्तु किञ्चित्कथनीयमस्ति नवीनकालग्रथितं हि चित्रम् ॥३९॥
विज्ञानवार्ध्युत्तरपारमेव प्रयातुमुद्यान्ति महीजनास्ते ।
पृथग्विधानैः प्रथिता प्रयत्नान् कुर्वन्त्यतन्द्राः प्रतिवारमारात् ॥
नवीनयानानि विधाय विद्युज्जवानि नानाकृतिभाञ्जि भूयः ।
संशोधनागारनिवाससक्ता मल्लोकमागन्तुमथायतन्ते ॥४१॥
दिने दिने तीव्रतरा च वृद्धिर्वैज्ञानिकानां महतां हि तेषाम् ।
निवर्धमानाभिविभाति शुक्ले मत्स्पर्धयेवोपचिता यथाहम् ॥४२॥
खगोलविद्यानिपुणाश्च यन्त्रं निर्माय नूत्नानिलशक्तिपूर्णम् ।
यियासवो धैर्यगुणावलम्बा मृगाङ्कसन्देहनिवृत्तिहेतोः ॥४३॥
तदुल्लसत्याम्रफलोपमं वा स्थूलं च कूष्माण्डनिभं तथैकम् ।
अन्यानि जम्बूफलरूपभाञ्जि ह्यायातुमिच्छन्ति मदीयलोकम् ॥
परन्तु शैत्यातिशयान्मदीये लोकेऽथवोर्ध्वं पवमानशून्यात् ।
तथाथवा कौशलहीनताया नाद्यापि ते वा विजयं लभन्ते ॥४५॥

हिमांशुमापृच्छ्य ततस्सहर्षं धरां यियासुः पृथुलाभिलाषः ।
आदौ गतोऽहं नगराजराज्यं मामुद्गतो यत्र हिमाद्रिनाथः ॥४६॥
तेनार्पितां प्रीतिरसातिसान्द्रां स्वीकृत्य पूजां विधिवत्तमेव ।
अनामयं पृच्छति मय्यवोचत्स विस्मयस्मेरमुखो गिरीन्द्रः॥४७॥
महीयसी भूरि महीतलेऽस्मिन्नभूतपूर्वा खलु बुद्धिवृद्धिः ।
मदीयमत्युन्नतशृङ्गभागं दुष्प्रापमप्यापुरतीव वेगात् ॥४८॥
दुःखं दुरूहं हिमपङ्क्तिमध्ये हसन्मुखेनैव सदानुभूय ।
नृसिंहयुग्मं शिखरं समेत्य ह्यजायत क्षिप्रमथो गतासु ॥४९॥
केचिन्महान्तः खलु खे विमाने गत्वा सुबिम्बग्रहणातुराश्च ।
शृङ्गत्रयं तुङ्गतमं हि लोके पश्यन्ति दूरेक्षणयन्त्रकेभ्यः ॥५०॥
जाने महर्षे न किमेव कुर्युर्नराश्च नानाविधकार्यसक्ताः ।
नक्तंदिवं नूतनशोधनेषु प्रभूतमुत्साहमभिप्रदर्श्य ॥५१॥
श्रुत्वेत्थमद्रीशवचः पिनाकिन् स्वयं दिदृक्षुर्भुवि मानवानाम् ।
विचित्रवैविध्यकृतीः समस्ता अयासिषं दीनजनावनार्थम् ॥५२॥
सर्वे जना वित्तसमार्जनेषु प्रसक्तिमत्यर्थमभिप्रदर्श्य ।
नन्दन्ति भूमौ भवसिन्धुमग्ना विस्मृत्य विश्वेश्वरपादसेवाम् ॥५३॥
प्रभूतलाभार्जनदत्तचित्तैर्न विक्रियन्ते किल वस्तुभेदाः ।
सत्यप्यनल्पे धनधान्यराशौ चित्रं जनेष्वत्र दरिद्रतास्ति ॥५४॥
दारिद्र्यबाधाविनिवारणार्थं न यान्ति देवं शरणं मनुष्याः ।
इहैव सौख्यं बहु मन्यमाना नामुष्मिकेष्वप्यथ विश्वसन्ति॥५५॥

विप्रा न चाप्यध्ययनक्रियासु तथैव सन्ध्याप्रणतीषु वापि ।
शिखा वराङ्गे न च कन्धरे वा यज्ञोपवीतं भवतीह तेषाम् ॥५६॥

पाश्चात्यविद्यालसितास्तरुण्यः स्वातन्त्र्यतृष्णापरिचोदिता नु ।
सर्वत्र पुंभिः सह भारतीयक्षेत्रेषु सन्तीह विचित्ररीतिः ॥५७॥

सुमङ्गलाभूषणमामनन्ति महर्षयो यं रमणीललाटे ।
स कुङ्कुमाक्तो रमणीयबिन्दुर्न दृश्यते तत्र विलासिनीनाम् ॥५८॥

कपोलयोः कान्तिमतोर्न चैव तथा हरिद्रा यवपल्लवाभा ।
निर्गन्धपुष्पाण्यलकावलीनां विभूषितानि ग्रथितानि भूयः॥५९॥

पित्रोर्वशे नैव भवन्ति पुत्रा गुरोरधीना न भवन्ति शिष्याः ।
नेच्छन्ति कान्ताः पतिपादसेवां सर्वे स्वतन्त्रस्पृहयावृता नु॥६०॥

न श्रूयते वेदवचःप्रसारो द्विजाननेभ्यः श्रुतिपारगेभ्यः ।
अन्तर्हितं सत्यमपि प्रपञ्चे धर्मो गतः स्वर्गमितीव भाति ॥६१॥

सीमन्तरेखाविलसद्वराङ्गा भद्राकृतश्मश्रुविराजितास्याः ।
शिखाकलापेन विवर्जिताश्च स्वनाममात्रेण भवन्ति विप्राः॥६२॥

प्रातः समुत्थाय सुरूपवत्यो वेणीद्वयालङ्कृतशीर्षभागाः ।
कन्याः करेषूत्तमपुस्तकानि प्रयान्ति कर्माणि विहाय धृत्वा ॥६३

न दृश्यते तत्र विभो मनोज्ञा सन्ध्यानतिर्नव्यवटुप्रतीर्णा ।
कन्याविवाहः क्रियते न चापि प्राप्ताभिषङ्गा भुवि मानवा हि॥६४

सर्वत्र देशे सितमानवानां भाषा प्रधानीकरणेन भाति ।
सर्वे समभ्यस्य च नूतनीं तां गीर्वाणवाणीं खलु विस्मरन्ति॥६५॥

तथापि काश्यादिमहापुरीषु कुत्रापि विद्वज्जनसाहसेन ।
प्रालम्बिता निश्वसती बतास्ते मूर्छाश्रिता दिव्यवधूरिवाद्य ॥६६॥
जाता स्वतन्त्रा किल पुण्यभूमिः राष्ट्रीयसेवारतमानवानाम् ।
यत्नैः पराभूतपराधिकारा विद्योतते चन्द्रकलेव रात्रौ ॥६७॥
धनप्रमत्ता धनिकाः कदाचिद्दारिद्र्यदुःखं न विदन्ति देशे ।
न खेचरा ज्योतिरधीश्वरा नु दुःखं तमःकाण्डमिवात्र भूमौ ॥६८॥
उच्चैः स्थितिं प्राप्स्यति दिव्यवाणी सा संस्कृता भारतजीवितं हि ।
पुनः समासात्मयशोवितानाः प्रपञ्चराष्ट्रेषु समेधमाना ॥६९॥
सम्मेलनानि प्रतिवर्षमस्मिन् देशे भवन्त्यार्थिकवृद्धिहेतोः ।
नानाविधान्यद्भुतपौरुषाणि काले कलौ सङ्घबलं बलिष्ठम् ॥७०॥
सङ्घो हि नामात्र समस्तसौख्यप्रदो जनानां नवनीतिदाता ।
स एव धर्मः स च रक्षिता नु स एव तेषां भगवत्स्वरूपः ॥७१॥
विद्यावतीभिर्वनिताभिरेष प्रचाल्यतेऽप्यर्भकभूरिवृन्दैः ।
तथा क्रियाजीविभिरप्यनूनं समाश्रितश्चित्रतमः समन्तात् ॥७२॥
आसेतुशैलेश्वरनिस्तृतापि द्विधा कृता भारतपुण्यभूमिः ।
म्लेच्छाभिधेभ्यो नररूपभृद्भ्यो निशाचरेभ्यः प्रथमा प्रदत्ता ॥
तथापि ते म्लेच्छजना न तृप्ता आक्रम्य हत्यानिरता भवन्ति ।
तस्मात्समस्तः क्षुभितो हि देशश्चाराजको भाति पदीतिभिन्ना ॥७४
वर्णाश्रमाणां न हि सन्ति भेदा न चास्ति जातिःकुलसद्विभूतिः ।
सर्वत्र चैकीकरणं पिनाकिन् परस्परं राजति सङ्करश्च ॥७५॥

युगे तृतीये कुरुपाण्डुपुत्रा महीश्वरत्वार्थमतीव भीष्मम् ।
यथा रणं चक्रुरिहैकदेशे जातास्तथाहोऽद्य समाचरन्ति ॥७६॥
भिन्नाशयानामपि राजकीये चावश्यकं चैक्यमिहाखिलानाम् ।
यतस्तदेवात्मबलं जनानां तथा हि राष्ट्रीययशोनिदानम् ॥७७॥
अस्पृश्यतादोषनिवारणार्थं समाजशुद्ध्यर्थमपीह देशे ।
महोन्नतादर्शसुसाधनार्थं देवालयाः सार्वजनीनकाः स्युः॥७८॥
विद्वत्सु देशे विनयो विनष्टो विप्रेषु वेदाध्ययनं न दृष्टम् ।
नारीषु लज्जापि तथा विकृष्टा सुखेन वासो भुवि चाद्य कष्टम् ॥
द्वेषस्तथेर्ष्या मदमत्सरौ च हिंसा च हत्यासहनं जनेषु ।
नीतानि वृद्धिं खलु लोकनाशं कुर्वन्ति सर्वाणि भयङ्करं नु ॥८०॥
रोगस्तथा तस्करदुष्टभीतिर्वृष्टेरभावोऽपि तथातिवृष्टिः ।
युद्धस्य भीतिर्मरणं क्षणेन षडीतयः सन्ति हि पुण्यभूमौ ॥८१॥
न मातृदेवास्तनया भवन्ति नाचार्यदेवाः खलु शिष्यवर्गाः ।
न भर्तृदेवा गृहिणीजनाश्च कलौ युगेऽस्मिन् किल चित्रमेतत्॥८२
विद्यार्थिनः कर्मपरा जना ये ये वाप्यभिज्ञाश्च परोपकारे ।
उन्मूल्य लोकेऽसमतां करालां चिकीर्षवः साम्यमिहायतन्ते ॥
युगेऽधिगन्तुं चरणारविन्दं कलौ त्वदीयं मुनिभिः प्रदिष्टः ।
भक्तिप्रधानः सुलभो हि मार्गस्तमप्यहो नानुचरन्ति मर्त्याः॥८४
ज्ञानप्रसारे जनतासमूहे कर्तुं यतन्ते कति देशभक्ताः ।
श्लाघ्योद्यमास्ते हि मयाभिनन्द्या निःस्वार्थता नन्वभिनन्दनीया॥
प्रत्यब्दमत्यन्तरयेण सार्धं गतातिभूमिं जनताभिसङ्ख्या ।
वृद्धस्तया भूमिभरोऽतिमात्रं हिनस्ति धात्रीमपि देवदेव ॥८६॥

नानाविधानाः शकटा रटन्ति सुरङ्गमार्गेषु रयेण यान्तः ।
भिन्ना क्षमा तेन तथाविधेन प्रवेपते वह्निकणान् किरन्ती ॥८७॥
क्षमागुणं वीक्ष्य वसुन्धराया दिने दिने रत्नगवेषणार्थम् ।
भिन्दन्ति भागानखिलान् भुवस्ते विशीर्यते सापि शुचा महत्या॥
तथापि धात्री जगतीजनानां सुखाय सर्वं सहते हि दुःखम् ।
अतो जनास्तां कथयन्ति नूनं सर्वंसहेति त्रिजगन्नियन्तः ॥८९॥
रुजो विधानानि नवीनरीत्या वैद्यैः प्रदिष्टानि लसन्ति लोके ।
शस्त्रैः क्षतानां क्रियते चिकित्सा अहो महद्धैर्यमभूतपूर्वम् ॥९०॥
वार्तावली भूमिविभागकेभ्यो विद्युत्सहाया बहुवेगयुक्ता ।
तन्त्रीशरीरेष्ववगाह्य दूरं प्रयाति तन्त्रीरहिता मुहूर्ते ॥९१॥
अङ्गप्रयागोज्जयिनीकलिङ्गा नानाविधा भारतदेशमुख्याः ।
गङ्गादिनद्यः सितमानवानां संपर्कहेतोः परिवर्तिताख्याः ॥९२॥
तथापि विश्वेश्वर विश्वमेतत्कारुण्यसिन्धो करुणावशेन ।
सुरक्षितं तिष्ठति दुःखसङ्घैरपि प्रतप्तं गिरिजासहाय ॥९३॥
सदा भवानीरमण त्रिलोकप्रपालनाख्ये निरतोऽसि कार्ये ।
तस्माद्विरम्य क्षणमद्य मात्रा क्रीडापरो देव भवेति याचे ॥९४॥
विस्मृत्य लोकावनकर्म कञ्चित्कालं हि कालान्तक खेलनेन ।
दासं त्वदीयं बहु याचमानं सन्तोषय प्रीतिभरेण शम्भो ॥९५॥

निगदितवति चैवं तापसानामधीशे
　निखिलजगदधीशश्चन्द्रमौलिर्जगाद ।
गिरिपतितनुजास्यं सादरं वीक्षमाणः
　त्रिभिरपि नयनानां सूचनार्थं रसज्ञः ॥९६॥

मुनिवर ननु लोके खेलनं सुन्दरीणां
भवति परवशेऽतो मत्प्रियायै भवान्यै ।
यदिह भणतु शीघ्रं तद्भवान् रोचतेऽस्यै
सकलमथ करिष्ये त्वन्मनोऽभीष्टसिद्धयै ॥९७॥

कथितमथ निशम्य प्रेमदात्री पुरारेः
स्मितरुचिरमुखी सा देववन्द्यं महर्षिम् ।
अवददतिदयालुः क्रीडनं रोचते ते
किमिह कथय सर्वं तत्करिष्ये सशम्भुः ॥९८॥

जननि जगति नान्यद्विद्यते द्यूतवर्जं
हृदयसुखदमद्धा चेन्द्रियप्रीतिदातृ ।
पुररिपुसहितायाः क्रीडितं तद्भवत्या
अतिकुतुकयुतोऽहं द्रष्टुमिच्छाम्यतन्द्रः ॥९९॥

दुर्गा नारदयाचनां श्रुतियुगादाकर्ण्य पत्युर्मुखं
ह्यङ्गीकारविमुद्रितं धृतियुतं दृष्ट्वा च रोमाञ्चिता ।
द्यूतं हर्षविवर्धनं मुनिसुखप्राप्त्यै प्रमोदान्विता
कर्तुं लोकधुरन्धरेण सहिता सज्जाभवच्छ्रीमती ॥१००॥

॥ सर्वं श्रीसाम्बसदाशिवदिव्यचरणारविन्दार्पणमस्तु ॥

॥ इति श्रीनागराजविरचिते श्रीशबरीविलासे काव्ये श्र्यङ्के ॥

॥ नारदागमनं नाम प्रथमः सर्गः ॥

|| द्वितीयस्सर्गः ||

|| द्यूतारम्भः ||

नारदः शशिमुखीशशिमौली वीक्ष्य रन्तुमनसौ परितुष्टः ।
भक्तिपूर्वमभिवन्द्य हृदि स्वे स्वागतोक्तिमिति सुष्ठु जगाद ||१||

द्यूतमेतदखिलादरणीयं खेलनं हि जगति श्रुतमास्ति ।
दृश्यते विविधराष्ट्रपदेषु क्रीडितं नवनवोन्नतरीत्या ||२||

नूतनानि विविधानि हि सन्ति क्रीडितानि च मदोन्नतिदानि ।
प्रत्नमेतदपि गौरवयोग्यं वर्धते त्वनुदिनं सकलत्र ||३||

कानिचिन्नु बलवृद्धिकराणि क्रीडितानि रुचिराणि हि लोके ।
बुद्धिवर्धनपराणि तथान्यान्युत्तमानि विलसन्ति महान्ति ||४||

राजयोग्यमिदमद्भुतवृत्ति खेलनं विजयते भुवि चास्याम् ।
धर्मराजनलभूपतिमुख्या दर्शितादरभरा व्यलसन्नु ||५||

अक्षखेलनमभून्नृपतीनां प्राणवायुरिह भारतवर्षे ।
श्वेतमानवकदम्बकमद्य प्राज्यकौतुकयुतं ननु तस्मिन् ||६||

तत्क्रमेण परिवर्तितशीलं विद्यतेऽतिभयदं सुखदूरम् ।
दुष्टमर्त्यदुरभीष्टनिपीड्यं चक्रविक्रमलसन्निजरूपम् ||७||

क्षत्रियेषु यदभूद्धिनिगूढं तद्बहिर्गतमहो व्यसनाय ।
जातिवर्णनियमानतिरिच्य दृश्यते भुवि सदाप्यखिलत्र ||८||

भूरिवित्तनिधिसङ्कलनार्थं द्यूतमाश्रितवती जनताद्य ।
धर्मबाह्यविधिभिर्वचनीयं तत्तया च पदमेव विनीतम् ॥९॥
अर्थराशिपणमेव विधाय क्रीडति प्रतिदिनं जनसङ्घः ।
आत्मनाशमपि चाविगणय्य ह्याशया किल युतश्च महत्या ॥१०॥
द्यूतवर्जमितराण्यपि सन्ति खेलनानि रुचिराणि बहूनि ।
देशकीर्तिबलवृद्धिकराणि कन्दुकादिभिरतीव लसन्ति ॥११॥
सूच्यते किल परस्परमेलैः कस्यचिज्जनपदस्य च शक्तिः ।
अस्ति च प्रतिशरज्जगतीह कुत्रचित्परिमितिः सुविशाले ॥१२॥
क्रीड्यते वटुवरैः सुविधानैः कन्दुकैश्च कमनीयवितानैः ।
स्पर्धिनं जनपदं च विजित्य पारितोषिकवरं लभतेऽन्यः ॥१३॥
श्वेतमर्त्यपरिसङ्घटनेन स्त्रीजनोऽपि नवकेलिषु रक्तः ।
पूर्ववच्च न महानस एव स्थानमस्ति विषये गृहिणीनाम् ॥१४॥
कार्यगौरववशात्पुरुषाणां नन्ववश्यमिह काचन केलिः ।
सैव मानसिकभारनिहन्त्री वर्तते नु भुवि सद्गृहिणीव ॥१५॥
सन्तु नाम शतशो विविधानि क्रीडितानि भुवने रुचिराणि ।
अस्ति पूर्वतनमप्यतिरम्यं द्यूतमग्रिममतोऽस्मि दिदृक्षुः ॥१६॥
द्यूतकेलिजनिता पुलकालिर्दृश्यते ननु तनौ रमणीया ।
भाति भूरि जलधेरिव तीरं सैकतावृतमिवात्र च गात्रम् ॥१७॥
वित्तसंचयमिदं बहु सूते द्यूतकेलिनिरतस्य जनस्य ।
तद्धनं क्षयमुपैति निमेषात् चञ्चलेति विदितं भुवि लक्ष्मीः ॥१८॥

धर्ममूलमिदमद्भुतवृत्ति द्यूतखेलनमपि प्रकरोति ।
कोपदुःखकलहान् बहुशो नु प्राणिनां सुखहरं भुवि चैव ॥१९॥
कारणं भवदुदारसुखानां पूरणं गिरिसुताशयपङ्क्तेः ।
धारणं जगति जीविततन्तोः खेलतां नियमतश्च भवन्तौ ॥२०॥
अश्नुते यदि जयं तु भवानी मा तदस्तु तव कोपनिदानम् ।
भाषितार्थवदिहार्थसुबोधे पृक्तयोर्भवति वां किमु भेदः ॥२१॥
दीव्यतः प्रतिदिनं सुविशाले भूमिनाम्नि फलके मनुजाक्षैः ।
तद्वदेव दयया सह देव्या दीव्य मत्प्रियकृते करुणाब्धे ॥२२॥
नीलकण्ठ भवदीयसुकेलिं तारकारिगणपौ सगणौघौ ।
पश्यतामनिमिषं ननु पित्रोः केलिरस्ति सुखदा हि सुतानाम् ॥२३
मङ्गलानि जगतां सकलानां खेलनं हि युवयोर्दिशताच्च ।
सस्यवृद्धिरपि भूमिविभागे जायतां जनसुखप्रदहेतोः ॥२४॥
नारदाननतलोद्गतगीतिं मञ्जुलां श्रुतिपुटैश्च निपीय ।
मोदमानमनसौ गिरिजेशौ सर्वतर्पणविधौ निरतौ नु ॥२५
राजताद्रिनिलये रमणीये व्याघ्रचर्मणि निषद्य गिरीशः ।
द्यूतकेलिमनघां सहभार्यः सम्यगारभत शास्त्रविधानैः ॥२६॥
वीक्षितुं हरहिमालयपुत्रीकूर्दनं सपरीतनिजान्ताः ।
आगताः सकललोकतलेभ्यः सिद्धकिन्नरवराः सुरमुख्याः ॥२७॥
देवदुन्दुभिरवे परिवीते दिव्यपुष्पनिचये परिकीर्णे ।
वेदघोषभरिते सुमुहूर्ते सम्यगारभत केलिमथेशः ॥२८॥

ब्रह्मविष्णुसुरकिन्नरयक्षाश्चक्षुषां मुदमवापुरनूनाम् ।
द्यूतकेलिरतयोर्हरगौर्योर्नारदे शुभगिरं हि गृणाने ॥२९॥

मङ्गलाभरणभूषितदेहा कङ्कणैर्झणझणन्निनदाङ्का ।
चन्द्रशेखरसती जयलक्ष्मीरूपिणीव विरराज नु साक्षात् ॥३०॥

चारुचन्द्रकलया विलसन्ती स्वर्णकुम्भसदृशस्तनभासा ।
लज्जयेषदवनम्रमुखी सा लोकनाथविजिगीषुरनिन्द्या ॥३१॥

पार्वती पुरहरं पुरतःस्थं भ्रातरं च निखिलामरनाथम् ।
द्यूतकेलिविजयाय च नत्वा दीव्यति स्म फलके पटुरीत्या ॥३२॥

नागराजमुखवातविकीर्णश्वेतभस्मपरिभूषितगात्रः ।
मन्मथोन्मथनजातविवृद्धज्वालयाभिविलसन्निजनेत्रः ॥३३॥

देहि मे पणमिति प्रणयाढ्यां भारतीं निजमुखाद्गमयन् सः ।
चण्डि कोपवशगाद्य च मा भूरेवमेव नवकेलिषु रीतिः ॥३४॥

मुग्धयोषिदिव शैलतनूजा चन्द्रचूडचलिताक्षरयेण ।
दिग्भ्रमं च समवाप्य रहस्यं खेलनस्य विजिता न विदित्वा ॥३५॥

शङ्करेण छलिता गिरिपुत्री निर्जिताभवदवाप च दुःखम् ।
सोऽपि वीक्ष्य मुमुदे दुरवस्थामात्मनोऽपजयपीडितचित्ताम् ॥३६॥

द्यूतपङ्कसरसीरुहकल्पं पार्वतीवदनपङ्कजमारात् ।
तत्क्षणे निजपराजयरूपहैमसंहतिवृतं शुशुभे वा ॥३७॥

वीक्ष्य चात्मनि भृशं परितप्तोऽप्यद्रिराजतनयां त्रिपुरारिः ।
खेदबिन्दुखचिताननपद्मामुच्चकैरपजहास वचोभिः ॥३८॥

देवि किं त्रिजगतां बहुभाराद्द्यूतमेतदपराजितयाद्य ।
नैव निर्जितमहो खलु भारस्त्वं हि पुष्पसदृशी विनतासि ॥३९॥

त्वत्कठोरतपसा गिरिबाले पूर्वमेव विजितस्तत्र भूत्वा ।
किङ्करोऽसि कृपयाद्य विमुक्तो नारदस्य सुरराजनुताङ्घ्रेः ॥४०॥

त्वं पुनर्मम भविष्यसि दासी द्यूतनष्टसकला ननु देवि ।
मन्निदेशवशवर्तिनि शीघ्रं सात्मकिङ्करगणा भव सज्जा ॥४१॥

भारती च कमला तव सेवादीक्षिते विरमतामधुनैव ।
नैव चामरसमीरणसेवा तेऽद्य वा प्रभृति चास्ति भवानि ॥४२॥

तां पराजयनिकारवितप्तां लज्जयानतमुखीं ललिताङ्गीम् ।
आत्मनः प्रियतमां कमनीयां वीक्ष्य वीक्ष्य समवाप विनोदम् ॥

वीक्षणैश्च हसितैश्च वचोभिः सा प्रतिक्षणमथो भवशम्भोः ।
नोदिता निखिललोकजनित्री दैन्यमाप लभते स्म च खेदम् ॥४४॥

सत्यमेव विजिता भवताहं नाथ किन्तु मम देह्यवकाशम् ।
यद्यहं पुनरपीह पणे त्वां सर्वथा प्रभुरथो नु विजेतुम् ॥४५॥

दीनयेत्थमवनीधरपुत्र्या याचितः पशुपतिः करुणार्द्रः ।
तां तथेति परिभाष्य पुनस्तद्द्यूतकेलिनिरतश्च बभूव ॥४६॥

अन्तरेण मिषमप्यखिलेशः पूरयत्यनुभूतामखिलान् यः ।
वाञ्छितान् स भगवान् किमु पत्न्या व्यर्थमाक्षिपति किंचिदभीष्टम्

साधु साध्विति सभासदवर्गे कुर्वति स्वकरताडनशब्दम् ।
पूर्ववत्परशिवः सह पत्न्या क्रीडितुं समभवत्किल सज्जः ॥४८॥

चञ्चला च वनिता विजयश्रीः पार्वतीं निजपराभवपीड्याम् ।
वीक्ष्य विश्वजयिनं विजहौ सा शिश्रिये स्त्रियमथो स्वजनीनाम् ॥

वामदेवनयनं खलु वामं तस्य वामतलवासरतायाः ।
वामचक्षुरपि च स्फुरतः स्म स्पर्धयेव युगपन्नवकेल्याम् ॥५०॥

तद्वदेव जगतामथ पित्रोर्वामबाहुयुगलं नयनाभ्याम् ।
सूचिते पथि गतं स्फुरणेन ह्येष लोकपरिपालितमार्गः ॥५१॥

सूचितोऽभवदनेन भवानीकेलिभव्यविजयो मदनारेः ।
किन्तु खेलनपराजयभावो भावुकस्य पुरतोऽस्ति हि सूची ॥५२॥

वामलोचनपरिस्फुरणेन प्राप्तधैर्यविभवा जगदम्बा ।
क्रीडितुं द्विगुणितोद्यमपूर्णा चक्रमे च चतुरा चलिताक्षा ॥५३॥

म्लानमाननसुमं गिरिजाया मन्दहासमधुपूरितमासीत् ।
कुड्मलाभकुचयुग्ममथैषन्नृत्यति स्म हृदये सरसीव ॥५४॥

नेत्रपङ्कजमभून्नवशोभानिर्भरेण भरितं रमणीयम् ।
वक्रदृष्टिरुचयो व्यलसन्तु स्वर्णवैद्युतकरा इव तत्र ॥५५॥

भूषणानि कनकाभशरीरे भावुकस्य विजयस्य मृडान्याः ।
शिञ्जितैः श्रुतिरसायनभूतैः सूचयन्ति विभवं स्म महान्तम् ॥५६॥

पूर्णचन्द्रसदृशाननबिम्बप्राज्यकान्तिपुरतश्च शिवायाः ।
चन्द्रशेखरजटासु निबद्धो बालचन्द्र इव केवलमासीत् ॥५७॥

अस्तु नाम नयनस्फुरणं वा वामबाहुचलनं च परन्तु ।
पार्वतीपतिमनो न चचाल धीरलक्षणमिदं खलु लोके ॥५८॥

शूलपाणिमपि पावकनेत्रं मृत्युमर्दनमनङ्गकृतान्तम् ।
व्याघ्रचर्मपरिधानमनन्तं जेतुमद्रितनया तु समैच्छत् ॥५९॥

नागभूषणमपि त्रिपुरारिं पञ्चशीर्षमसमाक्षमनीशम् ।
देवदेवमपि रुद्रमनल्पं तं चिकीर्षति जितं निजकेल्याम् ॥६०॥

कोटिभास्कररुचिं रुचिरास्यं भक्तपालनपरं जगदीशम् ।
चिन्मयं रसिकवर्यमथोमा ह्यात्मनो वशमियेष च नेतुम् ॥६१॥

प्राप्तपूर्वविजयः परमात्मा प्रायशोऽभवदथो किल मन्दः ।
पार्वतीं विजयिनीमथवैव द्रष्टुमुत्सुक इवास महात्मा ॥६२॥

ध्यानमग्न इव चेतसि किञ्चिच्चिन्तयत्यजिनवाससि तत्र ।
तं निरीक्ष्य विनिमीलितनेत्रं चण्डिकाक्षिपदथाशु किलाक्षान् ॥

देव पश्य च मयैव नवाङ्का ह्येकदाभिनवकेलिषु लब्धाः ।
ईदृशा च विधिना यदि शेषान् प्राप्नुवानि जयिनी नु भवेयम् ॥६४

एवमात्मदयितं प्रमथेशं मार्दवस्वरयुतं प्रवदन्ती ।
रंहसा च वलयीकृतहस्ता प्राक्षिपद्विजयकारणतोऽक्षान् ॥६५॥

पर्वतेशदुहितुः स्तनवस्त्रं भिन्नमक्षचलनोद्भववेगात् ।
कन्दुकाभकुचयुग्ममपश्यत्सस्पृहं यतिमनःप्रियकारी ॥६६॥

शैलजाभिनयमुग्धमपूर्वं वीक्ष्य वीक्ष्य रमते स्म पुरारिः ।
योऽस्य हेतुरभवत्प्रभवस्य तं शशंस भगवान् हृदि भूयः ॥६७॥

मेनकातनुजया सहसख्यासक्तया विजयया बहु रम्यम् ।
खेलितं च समवेक्ष्य महेशो विन्दते स्म परमात्मनि वृत्तेः ॥६८॥

मद्रया विरचिते स हि रुद्रो भद्रमुद्रितमहाभ्रसमुद्रे ।
त्रिश्वभद्रकरणः स्वयमाद्रों निद्रयाभियुयुजे स्वापितश्च ॥६९॥

हंसि हंसि मनसो मम चित्तं चञ्चलाक्षियुगलेन तथाक्षैः ।
व्याप्तमस्ति तदपीह स शम्भुर्निद्रयेति वदति स्म च भूयः ॥७०॥

आत्मनाहृतशिवार्धशरीरं निद्रयाप्यपहृते स्वसपत्न्या ।
नैव मन्युवशगा ललिताभूत्तोषमेत्र समवाप हि चित्रम् ॥७१॥

निद्रया परवशीकृतवृत्तौ देववन्दितपदे भुवनेशे ।
सर्वविश्वमभवज्जडताढ्यं निश्चलाश्च भुजगा हि बभूवुः ॥७२॥

निश्चलं जगदजायत सर्वं ध्वान्तपूर्णमचलेन्द्रतनूजा ।
शक्तिवैभवधरा च यथार्थं क्रीडति स्म विजयाय भरेण ॥७३॥

योगिनां हृदयमन्दिरवासस्तद्गवेषणपरः पुरवैरी ।
रागिणामपि तथैव विलासी निद्रयावृतमना निरयासीत् ॥७४॥

किन्तु सा क्षितिधरप्रियपुत्री स्वाक्षचालनपरास यथावत् ।
उन्मुखीव विजयाय विना तं किञ्चिदप्यगणयन्न हि तत्र ॥७५॥

सा क्रमेण जयमाप समन्तान्निद्रयाभिविनिमीलितनेत्रम् ।
नीलकण्ठमभिवीक्ष्य लताङ्गी विस्मयं परममाप नवीनम् ॥७६॥

उत्तमस्य च जनस्य सदैव नन्वियं हि सकलत्र च रीतिः ।
नैव ते तु विरमन्ति कदाचित्कार्यसिद्धिमनवाप्य भुवीह ॥७७॥

देवदेव किमियं शिव केलिर्निद्रितं ननु करोति भवन्तम् ।
द्रष्टुमद्य विजयं च मदीयं नेच्छसीह किमु दीनदयालो ॥७८॥

केवलं च निजकेलिनिमग्ना प्राप्तवत्यहमहोऽद्य जयं नु ।
सत्यमेतदपि विश्वसनार्थं मत्सखी च विजयाभिगृणातु ॥७९॥

भाविपूर्णविजयप्रभयाभिमुद्रितस्य वदनस्य भवान्याः ।
पार्वणेन्दुसदृशस्य पुरस्ताच्छङ्कराक्षिजलजं निमिमील ॥८०॥

जीयते दयितयेत्यवगाह्य धूर्जटे किमु निमीलितचक्षुः ।
जायसे मनसि संशयमेवं वर्धयस्यमितमात्मनि नूनम् ॥८१॥

दृष्टवानसि मया यदिह त्वं नीललोहित न खेलितमद्य ।
नारदादिमुनयश्च तथान्ये द्यूतवीक्षणपराः समभूवन् ॥८२॥

त्वत्कलेवरतले सततं ये दन्दशूकशिशवो विचलन्ति ।
यद्यहं विजयिनी भव तांस्त्वं पृच्छ संशयनिवृत्तिमवाप्तुम्॥८३॥

नन्दिनं च तव किङ्करवर्यं विघ्नराजमथवा तव पुत्रम् ।
वत्सराजवसुराजमुखान् वा पृच्छ देव जयिनी यदि न स्याम् ॥

नारदं मुनिवरं च तथैव बालचन्द्रमपि ते शिरसिस्थम् ।
स्वर्णदीमपि तथा विलसन्तीं त्वज्जटासु विषकण्ठ विशेषम् ॥८५॥

यद्यदस्ति हि पणीकृतवस्तु त्वद्गृहेऽद्य शिव देहि च सद्यम् ।
तत्तदेव न विना च विलम्बं यद्विभोऽसि जयिनी नवकेल्याम् ॥

इत्थमद्रिदुहिता कथयित्वा जोषमास च यदा हि सभायाम् ।
तत्प्रतिध्वनिरभूद्रजताद्रौ केवलं प्रतिबभाण न कोऽपि ॥८७॥

क्रोधमूर्तिरिति रुद्रमथैते मानसेषु च निजेषु विचिन्त्य ।
नाहुराबृतहृदोऽतिभयेनालेख्यचित्रितमुखा इव तस्थुः ॥८८॥

कुप्यति स्वयमसौ जनको मे यद्यहं हि जननी जयिनीति ।
सत्यवाक्यमपि वक्तुमनिच्छन् हा ग्रयान्निदमुत्रा च गणे शः ॥८९॥
केलिमेव सकलामहमैक्षे सम्यगेव जननीजनकौ मे ।
क्रीडतः स्म जयिनाविति मन्ये कस्तयोर्नु विजयी न हि जाने ॥९०॥
कर्णयोर्मधुरसायनतुल्यामात्मनः प्रियतमाननजाताम् ।
भारतीं च परिपीय गिरीशो वाक्यमाह जलदस्वननिस्वाम् ॥९१॥
देवि किं वचसि तेऽमृतकल्पे दर्शितः खलु मयेह कदापि ।
आदरेण रहितो निजभावः किन्तु वीक्षणपरः पुनरस्मि ॥९२॥
मङ्गलाङ्गि भवमीति जयाढ्या ज्ञातमास न मया न पुरैव ।
चारुकेलिमहमस्मि दिदृक्षुः क्रीडितां पुनरिहैव भवत्या ॥९३॥
मूर्तयोऽपि भुवने ननु तिस्रस्त्रीणि सन्ति भुवनानि च देवि ।
तद्वदेव गुणकर्मसु संख्या त्रिश्रुतेति विदितं सकलत्र ॥९४॥
तत्प्रिये मम मनः प्रियहेतोर्भूय एव निरता भव केल्याम् ।
उत्सुकोऽस्मि तव कौशलमुच्चैर्द्रष्टुमेष्यति ततश्च समाप्तिम् ॥९५॥
प्रार्थिता पुरहृता त्रिपुराम्बा नेति वक्तुमभवन्न समर्था ।
सा पुनर्द्विगुणितोत्सवपूर्णा स्वीयकौशलमदर्शयदुच्चैः ॥९६॥
बालेन्दुमौलिं ह्यबलाप्यबालाद्रिजाभिभास्या मुहुरीक्षमाणा ।
अक्षान् क्षिपन्ती क्षितिभृत्तनूजा पंचाक्षरं मन्त्रमथो जजाप ॥९७॥
शंभो महादेव जयेति वाचं सर्वे गणाः प्राञ्जलयः समूचुः ।
तथा जयाद्या विजयासमेता गौर्यै शशंसुर्विजयं हि सख्यः ॥९८॥

इत्थं जयध्वनितरङ्गसहस्रमाला-
श्रान्तः प्रविश्य रजताद्रिमहागुहानाम् ।
प्रत्यागताः प्रतिदिशं परिवर्धितान्ताः
प्रत्यध्वनन् रुचिररीतिविलासयुक्ताः ॥९९॥

द्यूतं ततः सकललोकमुदे गिरीशः
सार्धं धराधरवरात्मजया सहर्षम् ।
चक्रे पुनस्तदपुनर्भवकारणं स
प्रत्यक्षमिन्द्रविधिविष्णुधनेश्वराणाम् ॥१००॥

रजतगिरिवराग्रे खेलतोर्लोकपित्रोः
पुनरपि च पुरस्तात्सर्वलोकेश्वराणाम् ।
परमपरिमलाढ्या पुष्पवृष्टिस्सुराणां
करकमलविसृष्टा श्रीकरी निष्पपात ॥१०१॥

॥ सर्वं श्रीसाम्बसदाशिवदिव्यचरणारविन्दार्पणमस्तु ॥

॥ इति श्रीनागराजविरचिते श्रीशबरीविलासे काव्ये श्यङ्के द्यूतारम्भो नाम द्वितीयः सर्गः ॥

|| तृतीयः सर्गः ||

|| शिवपराजयः ||

तृतीयवारं परमेश्वरः स्वयं
प्रचक्रमे सार्धमथो द्वितीयया ।
सदावकाशः प्रथमं हि दीयते
पराजितानां विधिरेष केलिषु ||१||

निवेशय स्वीयमिहाखिलं धनं
धनेशमित्रात्र पणार्थमञ्जसा ।
यतोऽहमात्मीयविभूषणानि ते
न्यवेशयं चेत्थमुवाच पार्वती ||२||

इतीरितः शम्भुरभाषताम्बिकां
प्रिये न जानासि विरागिणां वरम् ।
यतो न किञ्चिन्मयि वर्तते धनं
समस्तलोकेषु मृगाक्षि मार्गितम् ||३||

अकिञ्चनानां प्रथमः प्रकीर्तितो
ममापि वृत्तिः खलु भिक्षयावृता ।
अतः कथं दातुमनल्पसंपदं
भवेयमद्य प्रभुरेव खेलने ||४||

तथापि रक्ष्या नियमावलिः सदा
जनैर्महाकेलिरतैर्हि चण्डिके ।
शपे च सत्येन यदस्ति वस्त्विह
प्रदीयते तत्पणहेतुना प्रिये ॥५॥

शृणु प्रिये पार्वति यद्यदस्ति मे
मुदा ददे कार्यमतो न शोचितम् ।
किमावयोर्नाम्नि हि लिङ्गमन्तरा
विभेदभावोऽपि भुवीह विद्यते ॥६॥

शिवे शिवा त्वं भवसीह तत्त्वत-
स्तथा शिवोऽहं खलु मङ्गलानने ।
मयि त्वदीये सति संशयं विना
मदीयमप्यत्र वशे च ते भवेत् ॥७॥

यदत्र गात्रं मम भूषयत्यलं
यदामनन्ति प्रभवं च संपदाम् ।
महर्षयो यच्च यतीन्द्रजीवितं
श्मशानभस्म प्रथमं हि चिन्त्यताम् ॥८॥

कलेवरे देवि फणावतां शतं
यदीक्षसे प्राणवतां ददामि तत् ।
यतः फणारत्नचयं विचित्य च
प्रभूतमानन्दमवाप्स्यसि द्रुतम् ॥९॥

तमःप्रकाण्डं परिहृत्य चन्द्रमा
    दिने दिने यस्य हिमांशवोऽनिशम् ।
दिशन्ति मर्त्येषु मुदं सुनिर्मलां
    तदीयरेखा च विभाति मस्तके   ॥१०॥

गृहाण तामप्यमरेन्द्रवन्दिते
    दितेस्तनूजक्षयकारिणीश्वरि ।
यदीच्छसि त्वं लभसेऽथवा जयं
    नवीनकेल्यां ननु मञ्जुलानने   ॥११॥

मृकण्डुपुत्रावनदीक्षिते मयि
    त्रिशूलमेतद्यदखण्डमद्भुतम् ।
चकोरनेत्रेऽच्छिनदुग्रविक्रमं
    प्रिये पणार्थं तदपीह कल्पये   ॥१२॥

पुरा पुराणां दुरतिक्रमं बलं
    निहन्तुमुद्युक्तवति प्रिये मयि ।
सखेव पाशो मम हस्तलाघवं
    ददौ च यस्तं रचयामि ते पणम्   ॥१३॥

पिनाकसंज्ञं च सुवर्णरञ्जितं
    धनुर्यदस्ति क्षणदाचरान्तकम् ।
विराजमानं मम पाणिपङ्कजे
    पणं करिष्यामि मुदे तव प्रिये   ॥१४॥

गजासुरं लोकनिपीडनोद्यतं
निहत्य पूर्वं सरसीरुहेक्षणे ।
तदीयचर्मावृतमेव बिन्दुभि-
र्धृतं मया यद्रुधिरस्य तद्दे ॥१५॥

महर्षिणा पाणिनिना महत्तपः
कृतं यदाहं डमरुं प्रताडयन् ।
यमीश्वरि व्याकृतिसूत्रसंचयं
विचित्ररूपं ह्यसृजं तमर्पये ॥१६॥

वृषो विशालाक्षि महान् हि वर्तते
मदीयसेवानिरतः प्रतापवान् ।
क्षणेन लोकान् सकलान् भ्रमाम्यहं
विमानचारीव च यस्य पृष्ठके ॥१७॥

इयं हि घण्टा रमणीयरूपिणी
स्वरेण यस्याः प्रतिबुध्यते जनः ।
भवानि भव्यं विजयं सुखप्रदं
समेत्य गृह्णासि च तां न संशयः ॥१८॥

विराजतेऽन्यद्रजताद्रिमन्दिरं
यदस्मदीयं भुवनेषु विश्रुतम् ।
जयात्समारभ्य कुशेशयाक्षि ते
त्वदीयनामाङ्कितमेष्यति ध्रुवम् ॥१९॥

भगीरथेनाचरितेन भूभृता
तपःकलापेन नभःप्रदेशतः ।
निपत्य वेगात्सुरदीर्घिका मया
जटासु बद्धा चपलाक्षि ते पुरः ॥२०॥

तदाप्रभृत्येव तव स्वसा प्रिये
शिरःस्थिता भूषणरूपिणी च या ।
भवत्सपत्नी भवतु त्वदन्तिके
पणीकृता केलिजिता शुभानने ॥२१॥

अधर्ममार्गस्थितमन्धकासुरं
जिघांसुरादाय पुरा रणोत्सुकः ।
महासिमेनं यमगच्छमाहवे
तमप्यहो कर्तुमहं पणं यते ॥२२॥

अनेकदैत्योन्मथनप्रभुः प्रिये
परश्वधोऽयं निशितः कराम्बुजे ।
विजृम्भते प्रीतिकरो रणोत्सवे
तमद्य चोपार्जय देवि खेलने ॥२३॥

सहस्रदैत्येन्द्रविमर्दनप्रभुः
परश्वधः प्रीतिकरो रणोत्सवे ।
विजृम्भते यो मम पाणिपल्लवे
महाट्टहासेन गृहाण तं प्रिये ॥२४॥

अखण्डमाखण्डलवज्रविक्रमं
विडम्बयन्तं मम वज्रमायुधम् ।
गृहाण भद्रे यदि शक्तिरस्ति ते
हिमालयानन्दिनि विन्दसे जयम् ॥२५॥

प्रपञ्चसंहाररतस्य चण्डिके
प्रचण्डनृत्यातिनिमग्नचेतसः ।
विना कपालस्रजमात्मनः प्रिये
न विद्यतेऽन्यद्भुवनेषु भूषणम् ॥२६॥

प्रलम्बमानां निजकन्धरे च ता-
मवेक्ष्य नूनं भयविह्वला भवेः ।
तथापि तां कर्तुमहं पणं सदा
तव प्रियार्थं प्रयते सकौतुकः ॥२७॥

तथैव कुम्भोदरमुख्यकिङ्करा
गणाश्च सन्ति प्रमथाभिधास्ततः ।
प्रमथगणो भूतगणश्च वर्तते
जिते मयि त्वद्वशगा भवन्ति ते ॥२८॥

प्रतिक्षणं पुत्रवदेव पालितो
गृहे मदीयेऽस्ति च देवदारुकः ।
तरुर्महान् तप्तसुवर्णवर्णको
निधाय मोदे तमपीह ते वशे ॥२९॥

जितस्मरं देवि जिताखिलान्तकं
जितेन्द्रियं मामजितं जितासुरम् ।
जितार्कचन्द्राग्निसहस्रविद्युतिं
पराजितं केलिवरे चिकीर्षसि ॥३०॥

उवाच वाचस्पतिनेव गुम्फितै-
र्वचोभिरित्थं हृदयाभिरञ्जनैः ।
शशाङ्कमुख्यै स शशाङ्कशेखरो
निरूप्य वस्तूनि ननन्द चात्मनः ॥३१॥

ततः क्रमेणात्मधनानि शङ्करः
पुरः प्रतिष्ठापयितुं प्रचक्रमे ।
सदैव सन्तो वचसा प्रतिश्रुतं
समर्थयन्ते क्रियया ननु द्रुतम् ॥३२॥

विधुं दधे स प्रथमं पणं प्रभु-
र्निपात्य शीर्षादभवद्विचन्द्रमाः ।
विधौ विरुद्धे शिवशीर्षसंस्थितो
यथा विधुः पातमुपैति ना तथा ॥३३॥

कला हि चन्द्रस्य कठोरचन्द्रमो-
मुखीपुरस्तादभवद्गतद्युतिः ।
जिता यतस्सा निमिषेण केवलं
करच्युताक्षप्रसरैर्मनोहरैः ॥३४॥

पणं व्यतानीत्फणिराजभूषण-
स्ततो द्वितीयं द्विरसज्ञमण्डलम् ।
विमुच्य सर्वं निजकायतोऽखिलं
फणीन्द्रवेण्याः प्रणिधाय चाग्रतः ॥३५॥

निशाम्य सर्पानतिदर्पसंयुतान्
फणामणिद्योतिततत्सभागृहान् ।
सहस्रसंख्यासु निपातितान् भृशं
ननन्द नन्दीशनुताङ्घ्रिपङ्कजा ॥३६॥

सरोरुहाक्षी हसिताननश्रिया
विमोहयन्ती विषमेषुविद्विषम् ।
जितः पणः पश्य मयेति शङ्करं
प्रभाषमाणा जगृहेऽहिमण्डलम् ॥३७॥

पराजिता पन्नगपङ्क्तिरद्भुता
वलक्षवर्णा सितभस्मसङ्गतः ।
प्रकाशयन्तीव च दुर्भरां शुचं
स्थिता श्वसत्यास शिनापि हर्षिता ॥३८॥

अमन्दहासा गिरिनन्दिनीमुखा-
त्तरङ्गमाला इव तत्र संसदि ।
विरेजिरे चित्रतरं समन्ततो
जयोद्धतानां ननु रीतिरीदृशी ॥३९॥

कुशाग्रवत्तीक्ष्णमथाङ्कुशं हरः
पुरः स्वपत्न्या विनिधातुमुद्यतः ।
कुशाग्रबुद्धिस्तु कुशेशयेक्षणा
क्षणेन सा तं जयति स्म केवलम् ॥४०॥

रहस्यमार्या सकलं विधानतो
नवीनकेल्या विविदे विवेकिनी ।
अतस्सगर्वं जयशालिनी तदा
मतिर्हि सूक्ष्मा महिलाजनस्य नु ॥४१॥

धनुर्गृहीतं तदनन्तरं तया
महन्महेशाङ्गुलिरत्नमर्पितम् ।
गणेशमात्रा सगुणं पणीकृतं
जया चकाराथ कराभिताडनम् ॥४२॥

गुणत्रयस्यापि निदर्शनं विभो-
र्निशाचराणां कुलनाशकारणम् ।
रणे प्रधानायुधमुत्तमोत्तमं
त्रिशूलमामुं त्रिपुराम्बिका ततः ॥४३॥

अनेककृत्वः प्रतिदीव्यति स्म सा
पतिः पशूनां त्यजति स्म नैव तत् ।
तथापि चान्ते जयिनी जगत्प्रसू-
रभूदभूतं समवाप संमदम् ॥४४॥

गते त्रिशूलेऽपि न शूलिमानसं
चचाल किञ्चिद्यदसावितीव च ।
शिवस्य यन्नश्यति वस्तु खेलने
प्रिया तदीया लभते शिवा हि तत् ॥४५॥

यमोऽपि यद्वीक्ष्य करे त्रिशूलिनः
पुरा चकम्पे भयविह्वलाननः ।
पराजितं पश्यति तन्मुदान्वितः
शशंस चित्ते ललिताङ्गशोभिताम् ॥४६॥

ततः कृपाणेन कृपाभिरक्षित-
क्षितिः क्षितीशाभिनुताङ्घ्रिपङ्कजः ।
गिरेर्दुहित्रा पणते ससंभ्रमं
पराभवं प्राप पुनर्भवोद्भवः ॥४७॥

निरायुधं तत्र निलिम्पविद्विषो
निरीश्वरं वीक्ष्य निरस्तभीतयः ।
निशाचराः प्राप्तपराभवाः पुरा
जिगीषयेषच्चलितात्मवृत्तयः ॥४८॥

कपालमालां निजकण्ठदेशतः
स नीलकण्ठश्च समुद्धृतां ततः ।
पणं चकाराथ सुलीलयाम्बिका
जिगाय तामप्यरविन्दलोचना ॥४९॥

पिनाकिनाक्षान् रभसेन दीव्यता
तथैव घण्टा डमरुः परश्वधः ।
पणीकृतानि क्रमशश्च खेलता
जितानि तानि क्षितिभृत्तनूजया ॥५०॥

द्वयं वशे ह्यद्वयवादिनोऽभव-
द्भवोद्भवस्यापि विहारशालिनः ।
शिरःस्थिता स्वर्गनदी विशेषतः
कटिप्रदेशे गजराजचर्म च ॥५१॥

किमद्य कर्तुं प्रभवेयमित्यथो
विचिन्त्य मौनव्रतमाश्रितः प्रभुः ।
परम्पराभिर्विजयस्य गर्विता
जगाद तं चैव वचोभिरुद्धतैः ॥५२॥

निधेहि गङ्गां प्रवराङ्गसङ्गिनीं
तव प्रभो मौनमिहाश्रितोऽसि किम् ।
प्रनष्टवस्तूनि पुनस्त्वयाधुना
विजेतुमात्मप्रभवो भवेर्न किम् ॥५३॥

न पण्यते सा वनितेति कूर्दने
न कश्चिदेवं कुरुतेऽभिमानवान् ।
पराजितान्येव परन्तु तां पणे
समस्तवस्तूनि समाप्नुमञ्जसा ॥५४॥

सदैव लोके भवतीदृशी मति-
र्मनीषिणामप्यमला मलीमसी ।
प्रिये भ्रमैः प्राज्यमरं च कर्पिता
जयाय नूनं कृपणेव वर्तते ॥५५॥

त्वदुक्तरीत्या प्रयते ममाखिलं
पुनः समामुं वसुसंचयं प्रिये ।
अतः पणे तां च दिवस्तरङ्गिणीं
ह्यपि स्त्रियं मे शिरसि स्थितां प्रियाम् ॥५६॥

विहीनमार्येऽजगवादिभिर्वरै-
र्महायुधैः पन्नगबालकैस्तथा ।
पुरेऽपि मे प्रस्थितमद्य कथ्यतां
क एष लोको मनुते च मां शिवम् ॥५७॥

इतीदमुक्त्वा परमेश्वरः स्वयं
निधाय गङ्गां पणते स कौतुकात् ।
जितेति साक्षानपि पश्य तस्य च
प्रदर्शयन्ती मुमुदे मृगेक्षणा ॥५८॥

विमोचिता बन्धनतः सुरापगा
स्वविक्रमप्रक्रमभीषदुत्सुका ।
सुरासुरेभ्यो निखिलेभ्य एव च
प्रदर्शयत्युत्सवनिर्भरं भ्रमैः ॥५९॥

उडु (रु) प्रभा शङ्करमूर्धनि स्थिता
बहिर्गता सा बृहदाकृतिं दधौ ।
विनाशयाम्यद्य जलेषु मेऽखिला-
निति ब्रुवाणेव पपात रंहसा ॥६०॥

उमाग्रजा (स्वसा)हं सुरवृन्दवन्दिता
पितावयोरप्यवनीभृतां पतिः ।
कनीयसीयं हि दुनोति मां कथं
भिनद्मि तस्या जयसंभवं मदम् ॥६१॥

पुरा सुरैरारचितेऽब्धिमन्थने
यथा गिरिर्मन्दरसंज्ञया श्रुतः ।
तथैव कैलासशिलोच्चयस्तदा
न्यमज्जदन्तस्त्रिदशापगाम्भसाम् ॥६२॥

ननाद भूयो निनदेन सा नदी
यथा नदानां शतमद्भुतं भुवि ।
तरङ्गमालाभिरपां च बिन्दुभि-
स्सितैर्भ्रमैर्बुद्बुदराजिभिर्बभौ ॥६३॥

करं धुनानः करिवल्लभाननो
विशुद्धगङ्गाजलमध्यसंस्थितः ।
परिभ्रमन् हर्षभरेण बुद्धिमान्
मणिप्रभं बिन्दुचयं विचिक्षिपे ॥६४॥

क्वचिच्छिवः शैवगणः क्वचित्ततः
  क्वचिज्जया वा क्वचिदेव पार्वती ।
क्वचित्सुरेन्द्रः क्वचिदेव नारदो
  ममज्ज गाङ्गे युगपज्जलान्तरे ॥६५॥

क्वचिद्विपञ्ची महतीति विश्रुता
  क्वचिच्च पद्मासनसुन्दरीकरात् ।
परिच्युता चारुनिनादकारिणी
  समाप्लुवेतां चलवीचिमध्यतः ॥६६॥

निमीलिताक्षं विषमाक्षमम्बिका
  निशाम्य निश्चेष्टमतीव कातरा ।
गणं तथा दिक्षु विदिक्षु विद्रुतं
  जगाम रामं मनसा मुदान्विता ॥६७॥

जजाप मन्त्रं जगदेकवल्लभा
  जगत्प्रियं राममयं मनस्विनी ।
जलान्तराले किल मज्जितात्मनां
  सुखं प्रदातुं तरणिर्यथा नृणाम् ॥६८॥

पवित्रमोङ्कारपदाभिमुद्रितं
  ह्यशेषपापाभिविशोषणक्षमम् ।
सुराश्च सर्वे प्रमथाभिधा गणा
  निमज्जनं प्रापुरतीव दुर्लभम् ॥६९॥

महापटाटोपविवृद्धमन्युना
समुद्रनीकाशतनुस्तनुश्रिया ।
निमज्जयामास समस्तमात्मनो
जले क्षणेनैव दिवस्तरङ्गिणी ॥७०॥

ततश्च सा मन्त्रवरप्रभावत-
स्तनूकृतात्मीयतनुस्तरङ्गिणी ।
ययौ निबद्धा भुजगीव पादयो-
स्त्रिविक्रमस्याप सुमस्रजः स्थितिम् ॥७१॥

पुराणपुंसः पदपङ्कजे स्थिता
नवीनपुष्पग्रथितेव मालिका ।
रराज गङ्गा चपलेव नीरदे
सुवर्णरेखा निकषे यथाथवा ॥७२॥

न मस्तके धारयितुं सुशिक्षिता
ह्यपीह नारी किल चार्हति ध्रुवम् ।
इतीव विश्वप्रभुरुद्धतां नदीं (धुनीं)
चकार मालामिव पादयोः शुभाम् ॥७३॥

विनष्टगङ्गस्य शिवस्य नाभव-
द्विनाजिनं वस्तु वशे न किंचन ।
विधातुमेतत्पणमैच्छदीश्वरो
न तत्र किंचिद्ददाति स तां प्रियाम् ॥७४॥

जितं त्वया सर्वमिहाद्य खेलने
विना न चर्माम्बरमस्ति वस्तु मे ।
अतोऽभियाचे भवतीं भवोऽप्यहं
जहीहि मामाचरणाय सत्तपः ॥७५॥

कपर्दनिर्बद्धनभोनदीरये
यथाक्रमं चेत्थमथो शमं गते ।
सभाजने पूर्ववदास्थिते पणे
पुनर्हसन्ती त्रिपुराम्बिकाकरोत् ॥७६॥

यतस्त्व वस्तूनि पराजितानि ते
पुनर्विजेतुं गजराजचर्मणा ।
सदा सुधीर्नैव जहाति कूर्दनं
ह्युदर्कमुद्वीक्ष्य न चान्तिमे पणे ॥७७॥

इति ब्रुवाणां कमलायतेक्षणां
प्रियां स्वकीयामनुमान्य शङ्करः ।
तथेति कृष्टो विजयाशया पणं
व्यधात्तदप्यास जितं तया ततः ॥७८॥

तथैव लोके खलु जन्तुरात्मनः
सहस्रदुःखैरपि पीडितः सदा ।
मनोरथानप्यनवाप्य जीवितं
करोति चाशाभिधतन्तुलम्बितम् ॥७९॥

ततः प्रभृत्येव शिवः प्रकीर्त्यते
दिगम्बरो वेति चिदम्बरोऽथवा ।
विरागिणामग्रगतश्च काननं
तपःक्रियार्थं परियातुमुद्यतः ॥८०॥

भवानि गच्छामि वनं वनेचरो
भवामि कन्दाशनतत्परः परम् ।
प्रपञ्चरक्षाभरणे विनिर्गते
स्वशीर्षतो ब्रह्मसुखं विशाम्यहम् ॥८१॥

निशम्य देवी परमार्थसंयुतां
वचःसुधां शूलिमुखाद्विनिर्गताम् ।
जयोद्धता नु स्फुरितोत्तराधरा
पणस्व चात्मानमभाषतोत्तरम् ॥८२॥

जितात्मनात्मा च मयेह कैतवे
न पण्यते प्रेयसि भूतिमिच्छता ।
महत्सु दुःखेष्वपि साधवः क्रमं
सदामुमेवानुसरन्ति विश्रुतम् ॥८३॥

भवामि नेतः प्रभृति त्वदुक्तिभि-
र्मनोहराभिस्तु विलोभितः प्रिये ।
शिशुः करो यस्य हि पावकक्षत-
स्तदन्तिकं नैव पुनर्गमिष्यति ॥८४॥

गिरीन्द्रकन्ये यदि तेऽद्य रोचते
त्वदीयकेतोर्विजयाभिसूचिनः ।
अधोवसाम्येकतमश्च किङ्करः
सहस्रसंख्याभिजनेषु मध्यगः ॥८५॥

विरुद्ध एव क्रम इत्युदीर्यते
मनीषिभिः कूर्दनधर्मवित्तमैः ।
अतोऽधिवासो भवतोऽत्र नेष्यते
यतस्त्वयात्मा न जितश्च केतने ॥८६॥

जयोद्धतोमामुखनिर्गतं मधु
प्रपीय कर्णद्वयसंपुटेन सः ।
निगृह्य कोपं जगदेकवल्लभ-
स्तिरोबभूव स्वयमेव तत्क्षणम् ॥८७॥

प्रशान्तशीताद्रिगुहागृहान्तरं
मृगेन्द्रधारिध्वानिगर्भमद्भुतम् ।
तमःपरीतं तमसां विनाशको
विवेश विश्वेश्वरनामभूषितः ॥८८॥

जितः स्वपत्न्या जितमन्मथोऽप्यसौ
पराभवं सोढुमनीश्वरस्ततः ।
निगूह्य चात्मानमियेष भूभृतो
गुहासु संप्राप्तुमहर्निशं सुखम् ॥८९॥

समागते शूलिनि पन्नगादयो
    विषाशने तीव्रविषासवो वनम् ।
सुखं च तस्मै प्रशशंसुरुत्सुका-
    श्चिरात्समायान्तमिवात्मबान्धवम्   ॥९०॥

यदा भवोऽभून्निजसुन्दरीजित-
    स्तदा दरीमेव विशिश्रिये ननु ।
यथा पतीनां प्रियकृन्नु सुन्दरी
    तथा यतीनां च महात्मनां दरी   ॥९१॥

सुमैः प्रफुल्लैस्सुमबाणविद्विषं
    लताः स्वकीयैस्तुहिनाद्रिमागतम् ।
कपर्दिनं दीनदयाकरं यथा
    ह्यवाकिरन् राजवरं पुरस्त्रियः   ॥९२॥

चुकूज चारुस्वनगीतिभिः पिक-
    स्तथा मयूरोऽपि जगौ शुभं स्वनम् ।
शुकश्च हंसश्च चकोरकाह्वयो
    जगुर्मनोहारि च गीतमुत्तमम्   ॥९३॥

सिताभ्रपङ्क्तिः स्वयमेव भक्तित-
    श्चकार सोपानसहस्रमीश्वरे ।
समागते शैलवरं पदाम्बुज-
    प्रभूतधूलीकणसङ्गकाङ्क्षिणी   ॥९४॥

यतेन्द्रियाश्वो यतिमानसस्थितो
यतीन्द्रिचिन्वन् प्रतिगच्छति स्म सः ।
गिरिं गिरीशो गिरिजापराजितो
महत्तपः कर्तुमनाः समाधिना ॥९५॥

उमाहृतार्धाङ्गतनोरभूत्तदा
महात्मनो वा विरहस्तया सह ।
विधिर्विचित्रः सकलत्र दृश्यते
समास्य दृष्टिर्भवतीति कथ्यते ॥९६॥

जुगुप्सया ये भुवि सारवर्जितं
विहाय संसारमतीव दुःखदम् ।
वनं सुखाय प्रतिपेदिरे सदा
त एव नूनं हि महाविरागिणः ॥९७॥

तथैव शम्भुः स्वसतीपराजितो
वनं विवेशात्मसुखाय केवलम् ।
परन्तु तत्रापि महर्षिभिः कृतं
विरागिभिः प्रापदथाग्रपूजनम् ॥९८॥

महर्षयो योगिवरेण्यमागतं
शिवं विदित्वा सहसाभ्युपागमन् ।
त्रियम्बकं वीक्षितुमुत्सुकास्तदा
मनः प्रमोदं प्रतिपेदिरे शुभम् ॥९९॥

सुदुर्लभं वीक्ष्य पुरः पुरद्विषो
विरूपनेत्रं ह्यपि सुन्दरं वपुः ।
तदास्तुवन् भक्तिभरेण चाञ्जलिं
निबध्य तेऽव्याजकृपारसाम्बुधिम् ॥१००॥

देव त्वदीयचरणाब्जपरागपूता
जाता वयं सुकृतिनोऽद्य कृपापयोधे ।
यद्दुर्लभं त्रिभुवनेऽपि सुरासुराणां
तद्दर्शितं शिव शिवं तव नः सुरूपम् ॥१०१॥

लोकत्रयेऽपि जनतार्तिहरस्त्वमेव
त्रैलोक्यनाटकमहाचिरसूत्रधारः ।
कामादिभिष्षडरिभिर्विनिपीडिताङ्गान्
संसारचक्रनिलये मथितान् करोषि ॥१०२॥

मातेव पासि भुवनत्रयजन्तुबृन्दं
बृन्दारकानपि तथैव दिवि स्थितांस्त्वम् ।
भूयः पितेव च बिभर्षि हि लोकभारं
धातेव धारयसि सर्वमिदं हि विश्वम् ॥१०३॥

विश्वेश्वर त्रिभुवनाण्डजपिण्डजानां
सृष्टिक्रियासु चतुरश्चतुराननोऽसि ।
त्रैलोक्यचक्रनिलये नितरां निषण्णो
लोकावनस्थितिपरोऽसि च चक्रपाणिः ॥१०४॥

त्वत्तः समुद्भवति विश्वमथात्मभूस्त्वं
नाशं समेति सकलं त्वमिहाविनाशी।
मायामयं जगदिदं त्वमतीतमाय-
स्त्वां नामरूपरहितं न हि कोपि वेद ॥१०५॥

अन्ते समस्तजगतां भुवनेश्वर त्वं
संहृत्य सर्वमिदमद्भुतनाट्यसक्तः।
रुद्र त्रियम्बक दिगम्बर चिन्मयेति
ह्युद्गीयसे ननु विभो नियतात्मभिस्त्वम् ॥१०६॥

एकोऽसि देव शिव नामसहस्रगीतो
रूपान्तराण्यधिगतोऽपि न तेऽस्ति रूपम्।
भिन्नोऽपि भूरि गुणभागविभागतोऽसि
ह्यद्वैतमूर्तिरिव नैव न विश्रुतस्त्वम् ॥१०७॥

एकं हि नाम भवदीयमुदारमाढ्यं
सम्यक् प्रयुक्तमपि पापधुतात्मभिर्नु।
जन्मान्तराकलितपङ्क्ततीः करोति
भस्मावशेषभरिता निमिषेण तेषाम् ॥१०८॥

मार्तण्डमण्डलसहस्रनिभात्ममूर्ते
फालाक्षिपावकविनाशितमीनकेतो।
चन्द्रार्धचूड शिव मङ्गलकारणं त्वं
शंभो विभो विजयसे नु पराजितोऽपि ॥१०९॥

पुष्पावलिर्मधुरसं मधुरं प्रसूते
भूमिः प्रदक्षिणविधिं निकषा दिनेशम् ।
नोल्लङ्घ्य किंचिदनुवत्सरमातनोति
सप्राणमस्ति सकलं भवतः कृपायाः ॥११०॥

तेजोनिधे भवदनुग्रहमन्तरेण
नैवेषदस्ति किल वा न वयं भवामः ।
तद्देवदेव दयया बहुदीनवृत्ती-
नस्मान् सदा नु परिरक्षसि दीनबंधो ॥१११॥

पुष्पेषु मार्दवमथाप्यबलाजनानां
श्रीविभ्रमौ चपलता मृगलोचनानाम् ।
आदित्यरश्मिखरता द्विजराजशैत्यम्
धीरेषु धैर्यमसि विश्वमयस्वरूप ॥११२॥

त्वं वेत्सि सर्वमिह वेत्ति न कोऽपि तु त्वां
सर्वं विनश्यति भवानचलप्रतिष्ठः ।
कालोऽसि कालरिपुरस्यमरेन्द्रवन्द्य
श्रीकण्ठ पाहि पतितान् पदपङ्कजे नः ॥११३॥

वाचामगोचर चराचरलोकनाथ
त्वामामनन्ति मुनयो विभुमद्वितीयम् ।
संसाररोगपरिपीडितविग्रहाणां
त्वामाहुरीश भिषजं वरभेषजं च ॥११४॥

सत्यप्रतिष्ठ भुवि निर्मलमत्यधर्म-
संस्थापनार्थमवनार्थमथावनेश्च ।
भूयः सतां च परिरक्षणदीक्षया त्वं
संजायसे प्रतियुगं च शतावतारः ॥११५॥

विज्ञानिनां त्वमसि चैव मतिः सुतीक्ष्णा
द्यूतं तथा छलयतामसि विश्वनाथ ।
सत्वं तथैव च रजश्च तथा तमस्त्वं
चैतन्यरूप त्रिभवेऽस्तु नमो नमस्ते ॥११६॥

अद्यार्जितं शिव महातपसां फलं नो
यद्दुर्लभं पदयुगं तव दृष्टमत्र ।
अस्माभिरेव यदतर्कितमत्र लब्धं
भाग्योदयं तमखिलं खलु मन्महे नः ॥११७॥

यद्यद्द्वयं च तनुमः शिव ते पदाब्जे
मोदामहे ननु समर्प्य यथाविधानम् ।
कर्ता त्वमेव किल कारयितासि साक्षि
बीजाङ्कुराविव यथा युगपत्तरूणाम् ॥११८॥

पदयुगपतितांस्ते पाहि नः पद्मजाद्यै-
र्दिविजगणसहस्रैः सन्नुताङ्घ्रे दयालो ।
भवदुरितशतौघैर्निर्धुतानां किमन्य-
त्पदनखविधुरश्मींस्ते विना नः शरण्यम् ॥११९॥

इति नुतिभिरनूनं संस्तुतो व्योमकेशः
परममुदमवापत्तापसानां समूहे ।
गणयति परितापं नैव किंचित्स कान्ता-
विरहजमपि देवो नूतनश्रीधरोऽभूत् ॥१२०॥

॥ सर्वं श्रीसाम्बसदाशिवदिव्यचरणारविन्दार्पणमस्तु ॥

॥ इति श्रीनागराजविरचिते श्रीशबरीविलासे काव्ये ॥
॥ श्र्यङ्के ॥
॥ शिवपराजयो नाम तृतीयः सर्गः ॥

॥ चतुर्थः सर्गः ॥

॥ पार्वतीविरहः ॥

निजकेलिजयेन गर्विता
हिमवद्भूधरनन्दिनी ततः ।
रजताचलशृङ्गमध्यगा-
त्स्वयशोमण्डलवर्धितानना ॥१॥

जननी जगतां मनस्विनी
विजयामाह गिरार्थगर्भया ।
सखि पश्य मदीयवैभवं
जगदीशोऽपि जितो जितस्मरः ॥२॥

अधिकारिपदेषु केवलं
सखि नारीजनमेव योजय ।
अहमेव यतोऽधिकारिणी
सकलस्येति विदन्तु शाम्भवाः ॥३॥

गिरिजा गिरिशं विजित्य सा
समवाप श्रियमद्भुतां ननु ।
जननी जगतस्तथाधुना
जनकोऽप्यासि हि सर्वमङ्गला ॥४॥

विजये विजयेऽपि दुःखदे
    जगतां शासनकर्माणि स्थिता ।
अतिदक्षतया त्रिशूलिना
    वियुता दक्षसुता श्रुता ननु   ॥५॥

पुरुषाः परिभावयन्त्यहो
    सकलाः ह्यात्मनि संस्थिताः क्रियाः ।
इति किन्तु न ते विदन्ति किं
    सहजा स्त्रीजनतासु दक्षता   ॥६॥

यदि नैव करोमि शासनं
    भुवनानामतिजाग्रती न्वहम् ।
सहसापयशोमलीमसं
    मम वंशद्वयमद्य जायते   ॥७॥

यदि नैव करोमि पूर्वव-
    च्छिन्नकर्माण्यपि कुर्वती भृशम् ।
अभिषङ्गनिपीडिता हला
    न भविष्यामि न सर्वथा ननु   ॥८॥

करुणाहससाहसादयो
    वरनारीजनसद्गुणाः किल ।
मयि सन्ति विशेषतः प्रिये
    सखि तैरेव करोमि शासनम्   ॥९॥

कृपया कृपणान्विपीडितान्
भुवि भक्तान् बहुदुःखपङ्क्तिभिः ।
पतितान् मम पादयोः सदा
ह्यनुगृह्णामि च सादरं सखि ॥१०॥

प्रकटीकृतविक्रमा जवा-
त्प्रहराम्यद्य निशाचरव्रजम् ।
मम शक्तिमुदीक्ष्य राक्षसा
न हि जीवन्ति निमेषमप्यहो ॥११॥

विजये मम विभ्रमैस्तथा
विजये वा त्रिपुरंद्विषं शिवम् ।
अपि घोरतपःक्रियास्थितं
वशमानीय विलासमन्थरा ॥१२॥

किमिहास्ति जगत्त्रयेऽपि मे
सखि दुःखं ह्यथ वस्तु दुर्लभम् ।
जगदीशविभूतिधारिणी
जगदम्बेति शिवेत्यहं श्रुता ॥१३॥

शिववामशरीरहारिणी
न हि जीवामि शिवं विना क्षणम् ।
नवकेलिजयेन गर्विता
कथमप्यद्य वियोगमासहे ॥१४॥

पुनरागमनं पुरद्विषः
　　प्रतिपाल्याहमतन्द्रिताधुना ।
प्रभवामि समस्तलौकिकं
　　भरमुद्धर्तुमनूनसंपदा　　॥१५॥

कृत एव मयागसां चयो
　　ह्यनुभोक्तव्यमिहैव तत्फलम् ।
विधिरेव महाबलः किल
　　प्रतिबध्नाति महेश्वरानपि　　॥१६॥

कलहान्तरितास्मि वा कृता
　　विधिरूपेण च नारदेन नु ।
किमु नारदनिन्दया फलं
　　मम दौर्भाग्यमिदं न संशयः　　॥१७॥

प्रयते प्रयतेन चेतसा
　　विरहं सोढुमतीव दुःसहम् ।
यदि न प्रभवामि तर्हि तं
　　शरणं यामि महेश्वरं ततः　　॥१८॥

पतिरेव गतिर्हि योषिता-
　　मिह चामुत्र पवित्रदैवतम् ।
स च कारणमेव संपदां
　　ननु तासामपि जीवितस्य वा　　॥१९॥

प्रविभाति विना नरोऽबलां
न तु सा जीवति तं विना क्षणम् ।
न हि विद्युदिहाम्बुदं विना
जलदो भाति विनापि विद्युता ॥२०॥

कथमद्य पुनर्लभे शिवं
शिवमूर्तिं मम जीवितेश्वरम् ।
तपसैव तपस्विगोचरं
महता लब्धुमथो नु शक्यते ॥२१॥

भुवनानि बिभर्मि पूर्ववच्-
च्छिवकर्माण्यपि कुर्वती सती ।
न भवामि पराङ्मुखी क्रिया-
विततावीषदपि स्थिराशया ॥२२॥

हृदयं स दयानिधिः शिवो
मम वेत्त्यत्र न संशयः सखि ।
दिशतीति विभावितः प्रिये
शुभमार्गं निजकर्मसु स्थिरम् ॥२३॥

प्रथमं परितो भ्रमाम्यहं
भुवनं गामधिरुह्य सत्वरम् ।
स विमानरयेण गच्छति
प्रसभं व्योमतले ग्रहो यथा ॥२४॥

इति वाचमुदीर्य तां मिथः
स्वयमन्तः प्रविवेश पार्वती ।
प्रणतिं प्रणयेन पूरितां
प्रणिधातुं प्रणवात्मने हृदि ॥२५॥

अनुरूपविभूषणानि सा
पणलब्धानि शिवस्य चात्मनि ।
विनिवेश्य गृहाद्विनिर्ययौ
सह सख्या विजयाख्यया ततः ॥२६॥

नवमेघनिभालकावलिं
निजशीर्षे निबबन्ध वा जटाम् ।
नवचन्द्रमथापि तत्र सा
निदधे चन्द्रविभूषणप्रिया ॥२७॥

डमरुं च पिनाकमद्भुतं
परशुं चैव कपालमालिकाम् ।
फणिराजमणिप्रभावलिं
निदधे सा निजगात्रके शिवा ॥२८॥

उपवासकृशा कृशोदरी
ह्यपि सा प्रोषितभर्तृका भृशम् ।
दिवि सूर्यसहस्रसन्निभा
मुखतेजोनिधिना व्यराजत ॥२९॥

उडुराजमुखी सखीयुता-
प्युडुराजार्धकलाभिधारिणी ।
अधिकं शुशुभे मनोहरे-
व च साक्षाद्विषमाक्षरूपिणी ॥३०॥

जय पञ्चमुखाम्बिकापते
जय मृत्युञ्जय दग्धमन्मथ ।
जय साम्ब दिगम्बरान्धका-
सुरशत्रो जय फाललोचन ॥३१॥

शिवनामसहस्रपूर्वकं
जयमन्त्रं समुदीर्य पार्वती ।
पृथिवीमटति स्म नन्दिना
सह सर्वाङ्गमनोहरा द्रुतम् ॥३२॥

पथि भक्तजनैस्समर्पिता-
मुररीकृत्य नतिं नुतिं तथा ।
यतिराजगवेषणोत्सुका
यतिवर्याननुगृह्य सत्वरम् ॥३३॥

अटवीषु तथाद्रिसानुषु
प्रसभं मार्गयति स्म वल्लभम् ॥
नगरीषु दरीषु सुन्दरी ।
ह्यपि सर्वत्र समुत्सुका सती ॥३४॥

खपतिं तु पतिव्रता शिवं
न ददर्शापि च कुत्रचिद्भुवि ।
कथमेष सुदुर्लभो विभु-
स्सुलभेनैव पथा नु लभ्यते ॥३५॥

अपि भूरि निपीडिताऽऽशया
विचिनोति स्म विचित्रवैभवम् ।
यतते मनुजो मनोरथं
सुखमार्गेण च लब्धुमादितः ॥३६॥

शिवमार्गणतत्परा शिवा
प्रतिपेदेऽथ बहुव्यथां तथा
विरहानलदग्धमानसा
भुजगीव श्वसिति स्म केवलम् ॥३७॥

अपि भूषणराजिभूषिता
शिवसान्निध्यविवर्जिता शिवा ।
क्षणदेव भकोटिपूरिता
शशचिह्नेन विवर्जिता बभौ ॥३८॥

अपि चन्द्रमयूखशोभिता
ह्यपि शूलादिमहायुधैर्युता ।
अपि शोकविमर्दनप्रभु-
र्न च संपूर्णकलावती सती ॥३९॥

जननी जगतामधीश्वरी
भ्रुकुटीनिर्जितकामकार्मुका ।
अपि शङ्करसङ्गवर्जिता
न च लेभे मनसः सुखं क्वचित् ॥४०॥

विरहाग्निविधूतविग्रहा
दिवि गङ्गाजलमज्जनादपि ।
समवाप न शान्तिमात्मनो
न सपत्न्या विरहः प्रशम्यते ॥४१॥

यदिहास्ति सुखं स्त्रिया मह-
त्पतिसङ्गात्तदवाप्यते किमु ।
कुसुमैश्च विभूषणैस्तथा
ह्यधिकारैरथवा धनैरपि ॥४२॥

पतिरेव धनं स्त्रियाः सुखं
विमला श्रीरपि कीर्तिरुज्ज्वला ॥
बहुना किमु सा हि तं विना
श्वसती वापि मृतेति कथ्यते ॥४३॥

बृहदुष्णमयैर्बहिर्गतै-
र्बहुनिःश्वाससमीरणैरुमा ।
अनुतापमथात्मनो भृशं
प्रकटीकर्तुमिवोद्यताभवत् ॥४४॥

हिमसन्निभचन्द्रिका निशा
    न च तस्यै सितचन्दनं दिवा ।
रुरुचे रुरुशावचक्षुषे
    सहवासोऽपि सखीजनैस्तथा ॥४५॥

कुसुमान्यसितालकेषु सा
    रमणीयानि न मेनकात्मजा ।
निबबन्ध सुगन्धबन्धुरा-
    ण्यपि पुष्पप्रियमण्डना ततः ॥४६॥

कनकाद्रिसुतासुता सती
    कनकाभात्मकलेबरे वरे ।
कनकाभरणानि नो दधे
    मणिवर्यानपि दुःखिता भृशम् ॥४७॥

रशनामपि नूपुरं च या
    सह भर्त्रानुदिनं व्यधाद्द्वयम् ।
अपि निर्गतकौतुकाधुना
    विजहौ विश्वपलावगोचरे ॥४८॥

विमुखी विरहाभिपीडिता
    विमला गानकलाविधावुमा ।
न हि नृत्यमपि स मन्यते
    बहु वैरस्यमवाप मानसे ॥४९॥

न शुकेन सखीजनेन वा
शिखिना केलिपरेण सादरम् ।
स्वसमीपगतेन भाषणं
सह चक्रे विरहेण पीडिता ॥५०॥

हिमशैलसुतापि वीजिता
हिमशीतेन सुगन्धग्राहिना ।
पवनेन पवित्रजाह्नवी-
जलसिक्तापि न विन्दते सुखम् ॥५१॥

न च मौक्तिकरत्नगुम्फितं
वरहारं मणिकुण्डले दधे ।
अखिलाकृतिधारणक्षमै-
र्भुजगैरेव बभूव भूषिता ॥५२॥

स्तनयोर्हरिचन्दनार्हयो-
र्भसितं केवलमीश्वराप्रियम् ।
निदधे निरपायमीश्वरी
निरवद्यापि निपीडिता भृशम् ॥५३॥

शयनीयमतीव कोमलं
ह्यधिशिश्ये न च मार्दवा निशि ।
शिवसङ्गसमेधिता सदा
सुखमेषा लभते न तं विना ॥५४॥

असिताञ्जनमायतेक्षणा
　　निदधे नैव कटाक्षयोस्तथा ।
कुपिते वनमाश्रिते प्रिये
　　परितोषाय नु कस्य भूषणम् ॥५५॥

शिवनाम जजाप सर्वदा
　　हरसंकीर्तनतत्परा भवत् ।
अभवापि भवं विचिन्त्य सा
　　पवमाने चलितेऽपि जागरा ॥५६॥

अनिमेषविलोचनाम्बुजा
　　करपङ्करुहचुम्बितानना ।
अखिलासु च दिक्षु दुःखिता
　　निजकान्तागमनं प्रतीक्षते ॥५७॥

कतिचिद्दिवसानि मूर्छया
　　ह्युपवासैश्च निरन्तरं कति ।
अतिवाहयति स्म पार्वती
　　कति बाष्पाम्बु विसृज्य केवलम् ॥५८॥

विरहः खलु सर्वदा नृणा-
　　मविषह्यो भवतीति विश्रुतः ।
पुरुषास्तु जयन्ति तं सदा
　　स च नारीभिरहो न जीयते ॥५९॥

तनुजं सुतवत्सला गुहं
गणयामास गणाधिपं न च ।
परमेशसती शुचावृता
पतिचिन्तासु परायणा सदा ॥६०॥

सचिवेषु निवेश्य शासनं
भुवनस्याखिलमद्रिकन्यका ।
पितुरेव पवित्रसन्निधिं
शिवमन्वेष्टुमगच्छदुत्सुका ॥६१॥

निजशैशवतोषदायिनीः
कमनीया गिरिकाननावलीः ।
प्रसमीक्ष्य चिराद्बभूव सा
प्रतिपन्नार्भकसंस्थितिः पुनः ॥६२॥

ननु शैशव एव सर्वदा
समयो वा परमोत्तमो नृणाम् ।
न तदा विरहोऽसमस्थिति-
र्न च तापत्रयपीडनं तथा ॥६३॥

अभिषेचनवर्धितांस्तरू-
न्निजपाणिद्वयसंभृताम्बुभिः ।
पुनरद्रिसुताभिवीक्ष्य सा
प्रतिपेदेऽभिनवां मुदं वने ॥६४॥

अवनीरुहसंश्रिता लताः
    परितो वीक्ष्य वनं च सस्पृहम् ।
नवकेलिजयं निनिन्द सा
    विरहस्य प्रथमं हि कारणम्   ॥६५॥

करिणीं करिवल्लभानुगां
    हरिणीं वानुगतां मृगं तथा ।
मिथुनानि रथाङ्गपक्षिणां
    मुहुरुद्वीक्ष्य बभूव लज्जिता   ॥६६॥

शशिना सहितां च कौमुदीं
    सहमेघां च निशाम्य विद्युतम् ।
पतिवर्त्मगतिर्विचेतनैः
    प्रतिपन्नेत्यपि भूरि विस्मिता   ॥६७॥

अतिशोकभरेण सन्नता-
    वयवा मन्दमगात्पितुर्गृहम् ।
सह केन शिवेन हेतुना
    परिपृष्टेति रुरोद नागता   ॥६८॥

अलिवर्णनिभां सुतालका-
    वलिमात्माङ्गुलिकप्रतर्जनैः ।
निजगाद मृदूक्तिभिश्च ता-
    मथ चाश्वास्य सुमेरुकन्यका   ॥६९॥

प्रियपुत्रि किमेवमागता
वद दुःखस्य च कारणं तव ।
विधिना प्रतिपादिता कथं
विरहस्यार्तिदशा तवाधुना ॥७०॥

त्वमपीह कलंकवर्जिता
कुलयुग्मं कुरुषे कलङ्कि किम् ।
मरजादपि सर्वथा सता-
मयशःपङ्कमतीवरिच्यते ॥७१॥

न सहे प्रियपुत्रिके कुले
ह्यपवादं परिशुद्धवृत्तिनि ।
न च तेऽपि मदीयमन्दिरे
वसतिर्युक्तमितीह भासते ॥७२॥

अपि ते जननी तथा सुते
प्रभवाम्यद्य न वासमत्र वा ।
अनुमन्तुमथोऽनुगम्यते
कलिकालाचरितो न दुष्पथः ॥७३॥

अत एव वनं गता सुते
तपसा वा कठिनेन वल्लभम् ।
परितोष्य गवेषणेन वा
सहितायाहि शिवेन मद्गृहान् ॥७४॥

परिरम्भणचुम्बनादिभिः
परिमुक्ता जननीजनेन सा ।
अटवीमटितुं जगाम ता-
मतिशोकावृतचेतसा द्रुतम् ॥७५॥

पथि बालमृगेक्षणा मृगान्
मृगणाकर्मनिमग्नमानसा ।
मृगनाभिसुगन्धवर्जिता
परिपप्रच्छ मनोरमात्मजा ॥७६॥

हृदयह्रदमध्यचारिणः
कुचहंसीयुगलस्य कम्पनात् ।
अति मन्दगतेर्निजां शुचं
प्रकटीकृत्य जगाम निर्भरम् ॥७७॥

यदि दृष्टिपथे सदाशिवः
समभूद्वो विपिने निरञ्जनः ।
दयया स दयालुरद्य मे
कथयध्वं भुवि कुत्र वर्तते ॥७८॥

दयितः स चिदम्बरो हि मे
हृदयेशो यदि दृष्टिगोचरः ।
अभवद्वसतिः समुच्यतां
कृपणायै मम सैव सत्वरम् ॥७९॥

इति वर्त्मनि काननस्य सा
विहगान्वा तुरगान् भुजङ्गमान् ।
शिवदर्शनकातरा सती
परिपप्रच्छ कृताञ्जलिः स्वयम् ॥८०॥

नितरां विरहाभिपीडिता
न च वेदान्तरमीपदप्यसौ ।
कृपणा भुवि चेतनेषु वा
विरहार्ता गतचेतनेषु तु ॥८१॥

कतिचिच्च पदानि शङ्करं
कलयन्ती कलिकल्मषापहम् ।
हृदये गहनेऽपि निर्दया-
वति मन्देन गतेन दुःखिता ॥८२॥

भवसागरमज्जितात्मनां
भव बन्धो भुवि दृष्टिगोचरः ।
अपराधचयं क्षमस्व मे
करुणाब्धे कृपया कृतं मया ॥८३॥

अनुतापवशादितीश्वरी
ध्वनिनोच्चैरतिगद्गदेन च ।
प्रययौ न विजानती दिशो
नयनाश्रुप्रतिरुद्धलोचना ॥८४॥

कुसुमं कृमिकीटसंहतिं
व्रततीं वा तरुसङ्गमेव च ।
परिपीडनचञ्चलेक्षणा
परिपप्रच्छ नगेन्द्रकन्यका ॥८५॥

पवमानचयेण वीजिता
ह्यभिषिक्ता कुसुमाभिवृष्टिभिः ।
विजनेऽपि वने वनेचरी
वनजाक्षीव च चक्रवर्तिनी ॥८६॥

कुसुमं कुसुमेषुपीडिता
शुकमेवापि शुचा प्रचोदिता ।
नगपं नगराजकन्यका
ह्यनुपप्रच्छ यथाक्रमं सती ॥८७॥

अबलापि बलाकमालिकां
खपथे श्वेतबलाहकावलिम् ।
शिववासमपृच्छदञ्जलिं
परिकल्प्याथ शिवा च वेदितुम् ॥८८॥

उडुराजमुमा निशीथिनी-
समयेऽयाचत शोकपूरिता ।
द्विजराज शिवो यदि त्वया
मम दृष्टः स हि कथ्यतामिति ॥८९॥

शिवरूपधरान् सुता गिरे-
गिरिवन्निश्चलमानसान् वने ।
दयया मम भर्तृदर्शनं
गहने कारयतेत्ययाचत ॥९०॥

क्वचिदेव वने मुमोह सा
क्वचिदप्यास निमीलितेक्षणा ।
स हि दृष्ट इतीह चिन्मयः
प्रवदन्ती भ्रमति स्म केवलम् ॥९१॥

यतते स्म विशाललोचना
ह्यपि निद्राश्रयमेव कानने ।
अधिगन्तुमुमा समागमं
निजभर्तुः समवाप्तुमुत्सुका ॥९२॥

श्रममाप यतः कुशाश्रिते
शयने स्वापमवाप नाम्बिका ।
किमु दुःखमये हि जीविते
पुरुषः शान्तिमथाभिपद्यते ॥९३॥

चिरं जटाचीरधरं विचिन्वती
चिदम्बरं नैव शशाक कानने ।
समीक्षितुं सा श्रममेव केवलं
समाप मृत्युञ्जयभामिनी ततः ॥९४॥

अथ विचलति पत्रे पुत्रिका शैलभर्तुः
पतति पतति वेगात्पक्षवातं विधूय ।
प्रचलितनिजनेत्रा दिक्षु दक्षाध्वरारिः
स्वनिकटमभियातश्चेत्यपश्यत्सलज्जा ॥९५॥

इति विरहनिपीडिता भवानी
भवमनवेक्ष्य च कुत्रचिद्वनान्ते ।
किमिति खलु करोमि मन्दभाग्या
मनसि विचिन्त्य शिलातले न्यषीदत् ॥९६॥

सरः समीक्ष्याथ सरोरुहेक्षणा
गिरौ स्फुरद्वा गिरिमानसोपमम् ।
भुवि श्रुतं मानससंज्ञया ययौ
स्वकीयचित्तस्फुरणेन चोदिता ॥९७॥

कुशेशयाक्षी कुशपत्रविष्टरे
सुखोपविष्टं च कुशेशयासनम् ।
तपस्विवर्यं च तपःसमाधिषु
स्थितं स्थिरं निश्चललोचना पपौ ॥९८॥

मुहुः पिबन्ती नयनद्वयेन सा
सुखाश्रुबिन्दुज्वलितेन शङ्करम् ।
ददर्श दम्भोलिधरादिभिर्नुतं
निजश्रमस्येह च मूर्तिमत्फलम् ॥९९॥

विकचकमलनेत्रा मित्रकोटिद्युतिं तं
मुहुरनिमिषपक्ष्मा वीक्षमाणा मृडानी ।
हृदयसुखमनन्तं प्राप्य पापापहन्त्री
चिरसमयमनैषीच्छ्रीलसद्वक्त्रपद्मा ॥१००॥

॥ सर्वं श्रीसाम्बसदाशिवदिव्यचरणारविन्दार्पणमस्तु ॥

॥ इति श्रीनागराजविरचिते श्रीशर्वरीविलासे काव्ये श्यङ्के ॥

॥ पार्वतीविरहो नाम चतुर्थः सर्गः ॥

॥ पञ्चमः सर्गः ॥

॥ शिवसमागमः ॥

विश्वनाथं विशालाक्षी हर्षबाष्पाकुलेक्षणा ।
ददर्श हृदयानन्दनिर्भरेणात्मवल्लभम् ॥१॥

पराजयात्समारभ्य गङ्गाशीतलवारिभिः ।
नाभिषिक्तं तपस्तीव्रं चरन्तं भास्करोपमम् ॥२॥

न भूषितं यथापूर्वं दन्दशूककिशोरकैः ।
द्योतयन्तं दिशः सर्वा भस्मना नापि भूषितम् ॥३॥

चन्द्ररेखावियुक्तात्मचूडं शूलादिवर्जितम् ।
परात्परं महादेवं देवदेवादिवन्दितम् ॥४॥

अनेकवत्सरारूढकेशाङ्कुरयुतानम् ।
दिगम्बरं चिदानन्दं स्थिरप्रज्ञं महाबलम् ॥५॥

महर्षिभिः स्तूयमानवैभवं भवनाशनम् ।
अपर्णाबन्धुमीशानं पावकाक्षं जगत्पतिम् ॥६॥

पश्चात्तापविधूतान्तःकरणा कामपीडिता ।
कामारिं कामसंकाशं ययौ शरणमम्बिका ॥७॥

ननाम नाम संकीर्त्य स्वमुच्चैः पादपद्मयोः ।
पुरारेरपतद्भाग्यशालिनी शैलनन्दिनी ॥८॥

सिषेच पादपद्मं तन्नवीनैर्नयनाश्रुभिः ।
विरहानुतापसंजातैर्मुक्ताफलनिभैः सितैः ॥९॥

मुनिजीवितसर्वस्वं सर्वदुःखनिवारणम् ।
मुक्तिदं भक्तमन्दारं भक्तिनम्रा ननाम च ॥१०॥

कबरीभ्रमरी तस्या असिता च जटीकृता ।
दृष्ट्वा शम्भुपदाम्भोजमपतत्स्वयमेव वा ॥११॥

आपादमस्तकं शम्भोर्गात्रं गोत्रेन्द्रनन्दिनी ।
पस्पर्श निजपाणिभ्यां कोमलाभ्यां मुहुर्मुहुः ॥१२॥

निमीलिताक्षं निष्कामं निश्चलं निर्भवं भवम् ।
निर्मोहं नित्यसङ्कल्पं निर्निमेषा निरैक्षत ॥१३॥

अङ्के शिवस्य कल्याणी निषसादाथ सादरम् ।
पाणिभ्यां भुजयुग्मं तन्निपीडयदुन्नतम् ॥१४॥

उज्जगौ जगदीशस्य पुरः प्रश्नशतं ततः ।
तथापि न समर्थाभूदुद्बोधयितुमीश्वरम् ॥१५॥

वचसा मञ्जुलेनाथ कलकण्ठी सुमध्यमा ।
देहीति वाक्यमेकं मे महेश्वरमयाचत ॥१६॥

तपसा कठिनेनासौ पूर्वमेव जितो विभुः ।
न जाने विधिना तेन प्राप्यते पुनरेव सः ॥१७॥

अतो विहाय तन्मार्गमालम्बेऽभिनवं शिवम् ।
विचिन्त्य मनसीत्थं सा विवेशान्तर्वनस्य च ॥१८॥
शबरीरूपमास्थाय सुन्दरं लोकमोहकम् ।
चारुता मूर्तिमत्येव साक्षाद्बहिरथागता ॥१९॥
कुन्तले मल्लिकापुष्पं शिरीषं कर्णयोर्द्वयोः ।
सीमन्ते कुसुमं नीपं कमलं करपल्लवे ॥२०॥
दधाना सर्वपुष्पाणां रजसा भूषितानना ।
वर्तुलाभिर्लताभिस्सा कङ्कणाकृतिभिर्युता ॥२१॥
बकुलं चम्पकं सुभ्रूर्मालतीं केतकीं तथा ।
तुलसीं मल्लिकां कुन्दमवचित्याकरोत्स्रजम् ॥२२॥
बिलेशयान् बिले न्यस्य चन्द्ररेखामथाम्बरे ।
कैलासे चायुधव्रातं वल्कलालङ्कृता बभौ ॥२३॥
स्तनवस्त्रं विना तस्या मांसलौ वर्तुलौ कुचौ ।
पञ्जराद्बहिरायातौ हंसाविव विरेजतुः ॥२४॥
शबरीकबरीभारो बालभ्रमररूपभाक् ।
नितम्बबिम्बकव्यापी रेजे शूर्पायताकृतिः ॥२५॥
काशेयवस्त्रगूढाङ्गसौष्ठवा चीरधारिणी ।
आविष्कृतातिलावण्या बभौ चारुतरं शिवा ॥२६॥
वनप्रसूनमालाभिर्भूषिता पुष्पिता वने ।
जङ्गमा हेमवल्लीव जगामान्वष्टुमाश्रयम् ॥२७॥

पिकमेकं निवेश्यात्मभुजे शैलेन्द्रनन्दिनी ।
वामेतरे शुकं चैव ययौ हंसीयुता जवात् ॥२८॥

अधिदेवीव सर्वस्य काननस्य महेश्वरी ।
ययौ श्रीदाक्षिणामूर्तिकृपायाच्ञार्थमञ्जसा ॥२९॥

दक्षिणा दक्षिणामूर्तेर्दक्षकन्या यथाविधि ।
प्रदक्षिणक्रियापूर्वं पुरश्चक्रे नतीः शतम् ॥३०॥

देहाद्यन्तं महेशस्य पस्पर्श प्रियतायता ।
पाणिभ्यां मार्दवाढ्याभ्यां पुष्पलावण्यधारिणी ॥३१॥

मृदुभ्यां पाणिपद्माभ्यां पार्वत्याः परमेश्वरः ।
न चचालेषदप्येष परिस्पृष्टो मुहुर्मुहुः ॥३२॥

शम्भोरुद्बोधने देवी ह्यसमर्था श्रुलोचना ।
अनर्गलाभिर्धाराभिर्नेनेक्ति स्म पदाम्बुजम् ॥३३॥

उद्वीक्ष्य शम्भुं बालेव बालारुणनिभानना ।
बबन्ध भक्तिभावेन ह्यानिमेषेक्षणाञ्जलिम् ॥३४॥

पञ्चषा नाडिकाः स्थित्वा पञ्चास्यप्राणनाडिका ।
विपञ्चीनादभूयिष्ठं पञ्चमस्वरमुज्जगौ ॥३५॥

विचित्रपदविन्यासैश्चिक्रीड पुरवैरिणः ।
साक्षान्नृत्यकलेवासौ पुरस्तात्त्रिपुराम्बिका ॥३६॥

कराभिवर्तनैर्भद्रा मुद्राः सार्थवतीस्ततः ।
कल्याणी दर्शयित्वाऽरमप्रियायाचाप नन्दथुम् ॥३७॥

न नृत्येन न गीतेन चारुणापि महेश्वरः ।
न मुद्राभिः समाधिस्थश्चालाचलजापतिः ॥३८॥

नटराजं स्वनाट्येन चिन्मयी चारुलोचना ।
न शशाक प्रयत्नेन सन्तोषयितुमीश्वरी ॥३९॥

निष्फलं श्रममुद्वीक्ष्य स्वकीयं पार्वती ततः ।
नुनाव भक्तिभूयिष्ठैः शिवं स्तोत्रैर्मनोहरैः ॥४०॥

कृत्तिवासः कृतः प्रायः प्रायश्चित्तो मयाधुना ।
अहङ्कारोऽपि सर्वेश सर्वो निर्वासितः प्रभो ॥४१॥

विज्ञाय देवदेवेश त्वदीयं वैभवं भव ।
विचित्रं विजयोन्मत्तचित्तयाचरितं मया ॥४२॥

पश्चात्तापाग्निना शम्भो विरहानलतापतः ।
संतप्तास्मि चिरादेवं पाहि मां पतितां पदे ॥४३॥

हर संहर मे दुःखमव्याजकरुणार्णव ।
देहि सञ्जीवनं श्रुत्योः प्रतिवाक्यं रसायनम् ॥४४॥

अहङ्कारविमूढाहमभवं भवमोचन ।
अद्य मे ज्ञानसंपत्तिर्लब्धा देव प्रसीद मे ॥४५॥

जगदीश जगद्भारमद्भुतं भूतवल्लभ ।
अभूद्व्यथा न मे काचिद्वहति त्वयि लीलया ॥४६॥

कथमेकाकिनी शम्भो वोढुमर्हामि तं पुनः ।
दयासिन्धो गृहीत्वा त्वं मत्तः पालय मां द्रुतं ॥४७॥

सथा नाथ सनाथेयं जगती निखिला त्वया ।
यथा ज्योतिष्मती रात्रिश्चन्द्रेणैव न चान्यथा ॥४८॥

जीवितं मे त्वमेवासि रोहिण्या इव चन्द्रमाः ।
पद्मिन्या वा सहस्रांशुर्लतायाश्च महीरुहः ॥४९॥

यावन्नोदेति नेत्रार्कस्तव शम्भो ममाननम् ।
सनेत्रपङ्कजं तावन्न विनिद्राति कान्तिमत् ॥५०॥

यावत्तपासि मग्नस्त्वमाश्रयो मे लता तनुः ।
कथं तावन्मदीयेयं वासन्तीव श्रियं वहेत् ॥५१॥

यावदेतन्मुखाभ्रं ते वचोवारि च सिञ्चति ।
तावन्मम कथं चित्तचातकस्तृप्तिमेष्यति ॥५२॥

कृतापराधा दीना च पीडिता विरहाग्निना ।
न भूरि लज्जायात्यर्थमभ्यर्थयितुमुत्सहे ॥५३॥

त्वदधीनं जगत्सर्वं त्वदधीनास्मि सर्वदा ।
यथा ते रोचते शम्भो तथा कुरु निरन्तरम् ॥५४॥

सर्वेश्वरस्य ते नैव ह्युपदेष्टुं स्थितास्म्यहम् ।
विनयेन च भक्त्या त्वामुपतिष्ठे च सादरम् ॥५५॥

विश्वरक्षणदक्षस्त्वं शर्व कल्याणवारिधे ।
किङ्करीं शाङ्करीं रक्ष प्रसन्नास्यः प्रियां तव ॥५६॥

श्रीकण्ठं कलकण्ठी सा सुतकण्ठीरवोपमम् ।
नीलकण्ठस्वना कर्तुं शक्ता जागरितं न च ॥५७॥

पार्वत्याः पार्वणेन्द्वाभमुखबिम्बोदयेऽपि तत् ।
नोन्मिमील विचित्रं नु भूतनाथाक्षिकैरवम् ॥५८॥

चिरं चिरन्तनी शम्भुमस्तवीद्भूरयश्वरम् ।
तथापि स विभुर्नैव प्रसन्नोऽभूद्वनावनौ ॥५९॥

मासः कति महादेवी ह्युपावासैः स्तवैः कति ।
तपसा कति सेवाभिः कति संकीर्तनैर्वने ॥६०॥

निनाय कालं कल्याणी देवदेवप्रियोन्मुखी ।
एवमेव गतास्तस्या बहुसंवत्सरा वने ॥६१॥

नृत्यं प्रियं प्रियस्येति सा ननर्त वनान्तरे ।
शबरीरूपिणी रम्या नीलकण्ठीव सस्वना ॥६२॥

भस्म तस्मै प्रियं चेति भस्मदिग्धा बभौ पुरः ।
तस्यापि देहमत्यर्थं भूषयामास भस्मना ॥६३॥

अभिषेकप्रियः शम्भुरिति मत्वा मृगेक्षणा ।
शुद्धगङ्गां स्वयं नीत्वा हस्ताम्बुजपुटेन सा ॥६४॥

यथेष्टमभ्यषिञ्चत्तं गायन्ती मधुरै रवैः ।
अभिषिक्तोऽप्यभूच्छम्भुश्चक्रवर्तीव नूतनः ॥६५॥

मानसे निर्मले हंसपरिपूर्णे मनोहराम् ।
मनोरमात्मजा चक्रे जलकेलिमथैकदा ॥६६॥

शबरीदेहसर्वस्वमपि रेजे यथा सरः ।
यतस्तस्या कुचौ हंसौ मुखमम्भोजमाक्षिणी ॥६७॥

इन्दीवरे भुजौ पद्मनालौ नाभिर्भ्रमोऽम्भसाम् ।
लावण्यं निर्मलं नीरं कबरी शैवलं तथा ॥६८॥

आत्मना विजितां चन्द्ररेखां विजयया ततः ।
आनाय्य तस्य चूडे सा यथापूर्वं न्यवेशयत् ॥६९॥

विद्युल्लेखेव सा रेखा जटाजूटघनं पुनः ।
अदीपयत्तया शम्भुः शुशुभेऽपूर्वशोभया ॥७०॥

बिलेशयान् गृहीत्वाथ बिम्बोष्ठी कर्णयोः प्रभोः ।
कुण्डलीकृत्य हेमाङ्गान् पादयोः करयोर्दधौ ॥७१॥

जीवद्भुजङ्गफूत्कारमारुतैरिव जीवितः ।
चचाल लोचनाम्भोजमुन्मिमील जगत्प्रभुः ॥७२॥

कपालमालिकां कण्ठे पुनस्तस्मै समर्प्य सा ।
मुमुदे चारुसर्वाङ्गी कृत्वा च करताडनम् ॥७३॥

घण्टां त्रिशूलं पाशं च डमरुं च परश्वधम् ।
सर्वं तस्यायुधव्रातं प्रत्यर्प्य प्रतिनन्दिता ॥७४॥

गङ्गामनङ्गविधुताऽनङ्गशत्रोर्जटावने ।
निदधे निर्विशेषं सा पूर्ववत्सर्वमङ्गला ॥७५॥

अर्धाङ्गीकृतदाम्पत्यसुखं जन्मनि जन्मनि ।
अनुभूय बभौ सेव कन्यकापरमेश्वरी ॥७६॥

कल्ये चोत्थाय कल्याणी कदाचित्सुमकोमला ।
आरामे शिवपूजार्थं पुष्पाण्याचिनुते स्म सा ॥७७॥

लतापार्श्वे स्थिता गौरी बभौ बालारुणानना ।
अरुणोदयवेलायामरुणांशुप्रदीपिता ॥७८॥

कठिनौ वर्तुलौ तस्याः पीनौ चारुपयोधरौ ।
तस्थतुः स्वागतं दातुं वक्षसीव पिनाकिनः ॥७९॥

कुन्ददन्तस्मिता देवी पक्वबिम्बाधरा वरा ।
पीनस्तनी पृथुश्रोणी निम्ननाभिर्मृगेक्षणा ॥८०॥

मृगेन्द्रमध्यमा कम्बुकण्ठी नीलालकावलिः ।
मत्तमातङ्गगमना पद्मरेखालसत्पदा ॥८१॥

श्यामलाधःकृतोद्यानलता शीतकरानना ।
विधातुः प्रथमा सृष्टिरिव रेजे वनान्तरे ॥८२॥

ददर्श दर्शनीयां तामुमां सर्वाङ्गसुन्दरीम् ।
कामेन चोदितः केनाप्यब्रवीदर्थवद्वचः ॥८३॥

मेघनिर्घोषगम्भीरं शब्दाडम्बरवर्जितम् ।
उमाकर्णामृतं दिव्यं रसनिर्भरनिर्मलम् ॥८४॥

नवीनागतचन्द्रांशुसंदीपितदिगन्तरः ।
जटाभारनमन्मौलिः प्रसन्नास्यः कृपामयः ॥८५॥

का त्वं सुन्दरि घोरेऽस्मिन् तिष्ठस्येकाकिनी वने ।
प्रकृत्या भीरु ते भीतिः श्वापदेभ्यो न चास्ति किम् ॥८६॥

शबरीरूपिणी किं त्वं सिद्धकन्याथवाप्सराः ।
विद्याधरी नु यक्षी वा गन्धर्ववनिता भवेः ॥८७॥

सर्वलक्षणसंपन्ने रूपेणाप्रतिमा भुवि ।
कुतस्त्वं पर्णशालां मे ह्यागतासि मनोहरे ॥८८॥

ऊढासि चेत् पतिस्तेऽपि कः शीघ्रं कथ्यतामसौ ।
किमर्थमागतात्र त्वं ब्रूहि सर्वमनिन्दिते ॥८९॥

क्षीराब्धिमथनाज्जातममृतं दातुमुद्यता ।
सुराणां मोहिनी किं त्वं मां मोहयितुमागता ॥९०॥

भस्मासुरं वरोन्मत्तं भस्मसात्कर्तुमागता ।
विष्णोर्मूर्तिरुत त्वं वा मोहिनीवेषधारिणी ॥९१॥

अथवा वासवाज्ञप्ता मत्तपोविघ्नहेतुना ।
उर्वशी वञ्चमानेतुमायातासीह किं शुभे ॥९२॥

भद्रेऽथवा नभोदेशात्पतिता विद्युदङ्गना ।
साक्षान्मूर्तिमती किं मां यतोऽन्धीकुरुषे त्विषा ॥९३॥

श्यामे श्यामालके सूर्यमण्डलादुद्गतासि वा ।
तेजसां कान्तिपूर्णानामेकत्वेन शरीरिणी ॥९४॥

रम्भा रम्भोरु जम्भारेराज्ञाधारिणी वने ।
समागतासि नूनं त्वं तस्य प्रियविधायिनी ॥९५॥

कैलासशिखराच्छम्भोर्विरहं सोढुमप्रभुः ।
साक्षात्त्वं भासि वार्येव शिवान्वेषणतत्परा ॥९६॥

आचक्ष्व चञ्चलाक्षि त्वं कस्य नूनः परिग्रहः ।
अथवा भावये नूनमनूढां कन्यकां वराम् ॥९७॥

आ दर्शनादहं सुभ्रु चित्तचाञ्चल्यपीडितः।
अनुरागोऽपि मे जातो त्वयि देवि विरागिणः ॥९८॥

सात्विकी मे तपश्चर्या नाधर्माध्वानि मानसम् ।
प्रचोदयति मामित्थं मन्ये त्वामपरिग्रहाम् ॥९९॥

अतः पद्मविशालाक्षि वस मेऽत्राश्रमे शुभे ।
रता मत्पादसेवायामनङ्गसुखदायिनी ॥१००॥

न कामये धनं भूरि नैव स्वर्गं न सत्तपः ।
कैलासशिखरं नापि त्वामध्येत्य सुलोचने ॥१०१॥

प्रसीद देवि कल्याणि कटाक्षैरनुगृह्य माम् ।
कृतार्थं कुरु दासोऽस्मि क्षणेऽस्मिन्नेव शोभने ॥१०२॥

यदि नैवं करोषि त्वं दीनं मां पङ्कजेक्षणे ।
भवामि निमिषेणैव कृतान्तातिथिरेव नु ॥१०३॥

यावद्व्यति मृडाङ्गि कृतान्तहतको न माम् ।
तावत्कुरु सुखस्पर्शैः सञ्जीवितमिहाञ्जसा ॥१०४॥

व्याहृत्येत्थं महादेवो विरराम हसन्मुखः ।
प्रसारितभुजस्तस्थौ शबरीबन्धनाय वा ॥१०५॥

वचनममृतकल्पं कल्पवल्लीमनोज्ञा
श्रुतियुगलपुटेन प्राज्यमापीय सुभ्रूः ।
पुनरपि विजयश्रीदीप्तवक्त्रा विरेजे
शरदि विमलरेखा शुक्लपक्षे यथेन्दोः ॥१०६॥

॥ सर्वं श्रीसाम्बसदाशिवदिव्यचरणारविन्दार्पणमस्तु ॥

॥ इति श्रीनागराजविरचिते श्रीशबरीविलासे काव्ये श्यङ्के ॥

॥ शिवसमागमो नाम पञ्चमः सर्गः ॥

॥ षष्ठः सर्गः ॥

॥ शबरीविजयः ॥

अथ हिमगिरिपुत्री शम्भुवाक्यं निशम्य
प्रशमितपरितापा तत्र रोमाञ्चिताङ्गी ।
अभिनवजलधारारूढसस्याभिरामाऽ-
भवदिव शमितात्मात्युष्णतापा धरित्री ॥१॥

तपसि निरतमीशं स्वीयरूपेण नीत्वा
निजवशमभिपेदे भूरिमोदं भवानी ।
क्षणयुगलमथैषा नैव जज्ञेऽभिवक्तुं
विजयपरवती तं शङ्करं लोकनाथम् ॥२॥

अभवदपि किरातीकिङ्करः शङ्करोऽसा-
वनुसरति तदानीमस्वतन्त्रः स तां च ।
प्रतिदिनमिव चोषाकन्यकां लोकबन्धुः
परमविमलहंसः पद्मिनीं मुक्तिनाम्नीम् ॥३॥

शिवमपि निजशक्त्या निर्मलैः सत्तपोभि-
र्वरशबरशरीरां कुर्वतीमात्मवश्यम् ।
परममुनिवरेण्या विस्मयं प्रेक्ष्य जग्मु-
र्निदधुरपि वनान्ते तर्जनीं नासिकाग्रे ॥४॥

दिवि सुरमुनिवर्या नारदाद्याः प्रयान्तं
तरुणविधुकराग्रैर्भूषितं नीलकण्ठम् ।
ददृशुरतिमुदा ते भक्तिभारेण नम्रा
अभिनुनुवुरुमेशं व्योमयानैश्च यान्तः ॥५॥

अपि पुरुषवराग्र्यः सत्वशाली महेशो
ह्यपि शशिरविनेत्रः फालनेत्रोऽपि भूयः ।
स्त्रियमनुचरति स्माकृष्टसर्वस्वतेजा
इव भुवि च यथायस्कान्तरेखामयस्ताम् ॥६॥

त्रिचतुरनिमिषाणामन्तरे चान्तरङ्गे
रजतगिरिवरेशध्यानमातन्वती सा ।
अतिचतुरवचोभिः स्प्रष्टुकामं निवार्य
प्रतिवचनमदात्तं कामबाणान् सृजन्ती ॥७॥

शिव शबरकुलेऽहं जन्म धृत्वा धरित्री-
धरवरवनभागे सञ्चरन्ती यथेच्छम् ।
त्रिभिरपि तव नेत्रैः पाविताद्यैव दृष्टा
त्रिनयन हि किमन्यद्विद्यते भाग्यहेतुं ॥८॥

भवति बलवती मे काचिदाशा भवारे
परशिवदयिताहं सेवितुं तं च भूत्वा ।
तव पुरुषवरस्याऽदर्शनादस्मि जाता
पुलकितनिजदेहा सत्यमेतद्ब्रवीमि ॥९॥

हर हर मम खेदं चापराधं क्षमस्व
स्पृशति भवति नाथे वारितं यन्मयाद्य ।
अपि जनकजनन्यौ कातरे मद्गृहे स्त-
स्तदनु च तदनुज्ञां प्राप्य पत्नी भवामि ॥१०॥

अतिबलपरिपूर्णं यूथनाथं वशेव
ह्यपि मदगजमाढ्यं सिंहसंहारदक्षम् ।
चकितहरिणनेत्रा सा चकर्ष स्वरूपा-
तिशयभरितदेहा सर्वलोकैकनाथम् ॥११॥

विजयविभवपूर्णा पूर्णिमेन्दूपमास्या
धृततरुणविधोः सा वामपार्श्वे चरन्ती ।
पथि मधुरवचोभिः सत्कथाभिस्तथास्य
व्यपनयति ननु स्माप्यध्वखेदं समस्तम् ॥१२॥

प्रतिपदमपि पत्युः पादधूलीकणानां
निचयमपि ललाटे धारयन्ती मृडानी ।
अधिगतनवकान्तिः शोभते तेन तन्वी
नमुचिरिपुदिशीव प्रातरादित्यरेखा ॥१३॥

किमपि किमपि तस्याः स्नेहपाशेन बद्धः
पुररिपुरपि चैव व्याहरन् वाक्यमीशः ।
नयनयुगलकोणोद्भाविभिर्दृष्टिपातै-
र्वनचरवनितायाः भ्रान्तचित्तो जगाम ॥१४॥

रमणि विहगयुग्मं पश्य पद्मायताक्षि
प्रथितसरसि केलिप्रार्थिता शम्भुनैवम् ।
गिरिपतितनुजाता सार्थमुक्ताप्यपश्य-
त्तदपि तदनु लज्जानम्रवक्त्रा प्रतस्थे ॥१५॥

भवति शिरसि गङ्गा मङ्गलाङ्गी तवाङ्के
तदनु तदनुजापि प्रीतिपात्रं भवानी ।
यदि शबरवराङ्गीं मामपि स्वीकरोषि
प्रभवितुमहमूढा स्यां कथं सौख्यपूर्णा ॥१६॥

इति वचनमधीशोद्भूपिताङ्गः शबर्या
ह्युदितमभिनिशम्य प्रत्यवादीत्सहासः ।
अहमतिचतुरेति स्वाभिमानाभिपूर्णां
चतुरतरगिरासौ सान्त्वयंस्तां मृगाक्षीम् ॥१७॥

अपि मम शिरसिस्था केशपाशैर्निबद्धा
किमपि तव हि कर्तुं नैव शक्तास्ति नूनम् ।
पणविजयविमत्ता सापरा पार्वती मां
यदि पुनरुपगच्छेद्वामतस्तां करिष्ये ॥१८॥

शबरि कुचभरेणानम्रसर्वाङ्गशोभां
मम हृदयतले त्वां स्थापयिष्ये कुतस्ते ।
भयमपि मयि लेशः संशयस्यापि भूयो
लल चिरमिह शान्तस्वीयवृत्तिर्यथेष्टम् ॥१९॥

पशुशिव रजताद्रौ सा प्रिया पूर्वभार्या
वसति च विपुलाहंकारमत्ताधिकारा ।
श्रुतमिति कथमावां तत्र शान्त्या वसेव
प्रलपितमिदमीशः सूतरं पच्छति स्म ॥२०॥

स भवतु रजताद्रिर्मद्विहीनस्तु तस्या-
स्तव भवति हृदद्रिस्तप्तचामीकराभः ।
मम सुखतमवासो वासितोरस्थले ते
स्तनयुगलशुभाद्रिर्भाग्यहेतुः किमन्यत् ॥२१॥

रसभरितमतीवालापमन्योन्यभाव-
प्रकटननिरतौ तौ सुन्दरीसुन्दराङ्गौ ।
अतिमधुरवचोभिः कैतवेन प्रियार्थं
वनभुवि रचयन्तौ जग्मतुर्हर्षपूर्णौ ॥२२॥

मनसिजमतिदग्धं ह्यात्मनोज्जीवयन् स
स्वयमपि करुणाब्धिः शङ्करः केलिमग्नः ।
सह शबरसुवध्वानङ्गलोलो युवेव
प्रभुरचरदनूनं कानने कान्तिपूर्णे ॥२३॥

अहमतुलबलाढ्या वस्तुतः पार्वतीति
प्रभुरयमिह नूनं नैव जानाति मां तु ।
इति मनसि विभाव्यानन्दमाध्यातासौ
परमशिवरहस्यं वेदितुं कः समर्थः ॥२४॥

विरहमसहमाना मानिनी मेनकायाः
प्रियतमतनयेयं सैव नूनं न शङ्का ।
दृढमतिरिति मत्वा प्रीतिमान् सर्ववित्तां
मुनिवदनुचचाराज्ञाततत्सत्यकृत्यः ॥२५॥

त्रिभुवनपितरौ तावित्थमात्मप्रियार्थं
प्रथितनिजगुणानन्यप्रकाशाविवास्ताम् ।
नयविनयविधिज्ञौ मोदमानौ समन्ता-
त्कृतवपुरुपवृत्तिं चाश्रयन्तावनिन्द्याम् ॥२६॥

अहमिह न तु यक्षी नैव गन्धर्वकन्या
न च सुरवरसेवादीक्षिता चाप्सरस्त्री ।
शिव तव पदसेवाकाङ्क्षिणी काननान्ते
वनचरकुलजाता काचिदेवाबलाहम् ।२७॥

उदधिमथनवेलाजातपीयूषवर्ष-
प्रतिवितरणशीला मोहिनी नैव चाहम् ।
कथमहमबला वा मोहयेयं महेशं
परमशिवमिहस्थं काममोहादि[illegible] ॥२८॥

यदिह मुनिवरेण्यैर्नैव योगीन्द्रमुख्यै-
र्दमशमनिरतैर्वा लभ्यते पादपद्मम् ।
मम तदिदमुदारं पूर्वपुण्येन शम्भो
ससलिलनयनाभ्यां दृष्टमानन्दसान्द्रम् ॥२९॥

शिव पदवरिवस्याभ्यासमाजन्मकाला-
दविरतमधिगत्याप्रत्यवाया तदीया ।
गिरिश कथमहं त्वां तत्पदे दत्तचित्ता
वद परमदयाब्धे कन्यकानूढवृत्तिः ॥३०॥

हर तव दयितैव प्रीतिपात्रं चिरान्मे
भवहर हर दुःखं पीडयद् दुष्प्रसह्यम् ।
कमलनिभकराभ्यां पीडयित्वा मदीयं
करकुसुममनन्यः कारयेमां सहासाम् ॥३१॥

इति सह गिरिशेनालापमातन्वती सा
स्तनभरनमिताङ्गी ह्रीविनम्रापि शीघ्रम् ।
मदगजगतिरीषद्राजगम्भीरवाणी
तमथ गृहमनैषीद्देवदेवादिवंद्यम् ॥३२॥

पथिषु परिचितेषु प्राणनाथं नयन्ती
शिखरिवरनितम्बेष्वीषदायासशान्त्यै ।
कतिचिदुपलपङ्क्तौ सन्निषद्य क्षणान् सा
रजतगिरिमुखी तं भूरि चक्रे सहर्षम् ॥३३॥

अचलमनतिदूरादीक्षणाभ्यां स शूली
झटिति विकसिताभ्यां वीक्ष्य भूयः प्रपेदे ।
पुलकितनिजगात्रः स्वीयगेहं च मोदं
पुनरधिगतराज्यो देवराजो दिवीव ॥३४॥

सयमयमखिलेशं वेदवेद्यं पुराणं
पुररिपुमचलाक्षा वीक्षमाणाः समन्तात् ।
प्रमथगणसमूहा भक्तिनम्राः समापु-
र्हृदयसुखमपूर्वं पूर्वदेवान्तकं तम् ॥३५॥

सरहरमपि वीक्ष्य श्वेतशैलावलिः सा
न्वभवदतिचिरादेवागतं रुद्रमार्द्रा ।
विरहमनुभवन्ती प्रोषितात्मप्रियार्या
धवमिव पुनरात्मोत्सङ्गसङ्गाभिलाषम् ॥३६॥

पशुपतिनिकटे ते किंतु नारीमथान्यां
निजनयनयुगेनोद्वीक्ष्य संभ्रान्तचित्ताः ।
प्रियरमणमरण्ये सा विचेतुं गतासी-
दिति किमु न निवृत्ता का द्वितीयाबलेयम् ॥३७॥

विविधभुवनवासा सिद्धगन्धर्वयक्षा
अपि च सुरनराद्याः शीघ्रमाकाशवाण्या ।
शबरवनितया प्रत्यागतः सार्धमीशः
श्रुतियुगलसमीपं प्राप्य चेत्याययुस्ते ॥३८॥

सनकमुखमुनीन्द्राः सप्त सप्ताश्वतुल्याः
सुरमुनिरपि वीणाभूषितो नारदाख्यः ।
विधुरपि निजलोकाल्लोकचक्षुः स्वकीया-
त्प्रणयभरितचित्ताश्चाययुर्द्रष्टुमीशम् ।३९॥

गणपतिरपि धावंश्चागतं भूरिकाला-
दथ सह गुहनाम्ना स्वानुजेन प्रहृष्टः ।
पवनविधुतशुण्डादण्ड एवाययौ तं
पितरमपि विलोक्य प्राप चित्तप्रमोदम् ॥४०॥

निखिलभुवनपालः सिन्धुकन्यासमेतो
धृतवरवनमालश्चागतो द्रष्टुमीशम् ।
विधिरपि सह वाण्या वीणया युक्तयागा-
द्धिषणसुरवराभ्यां सार्धमर्धेन्दुमौलिम् ॥४१॥

सुतयुगलमथेशो मूर्ध्नि चाघ्राय विष्णुं
विधिमपि सुरनाथं गीष्पतिं पाणिना च ।
स्मितमुखसितपद्मादुद्गतैर्मन्दहासैः
कुशलमनुयुयोजश्चेतरान् कम्प्रशीर्षैः ॥४२॥

शिव शिव शिव साम्ब श्रीमहादेव शम्भो
जय जय चिरकालं राजताद्रौ भवान्या ।
सह सकलगणौघैरित्थमानन्दपूर्णै-
र्विजयपदसुघोषैः स्वागतं प्राप भर्गः ॥४३॥

अथ शबरकुलस्त्रीरूपिणी सा भवानी
सह निजभवनान्तः प्राप्य सख्या क्षणेन ।
धुरि वरवनितानां कीर्तनीया समाया-
द्विजयविभवपूर्णा स्वीयरूपं हि धृत्वा ॥४४॥

विलसितनिजगात्री चन्दनेनानुलिप्ता
दशशतदिननाथस्वीयकान्तिः प्रणम्य ।
द्रुतमिह सकलं भो मेऽपराधं क्षमस्व
प्रियतममवदत्सा चण्डिकेतीन्दुमौलिम् ॥४५॥

तव शिव शबरस्त्री पार्श्वगोः सञ्चरन्ती
ललितवदनलक्ष्मी रूपसौभाग्यराशिः ।
कथमिह भवतैषा कुत्र पृच्छाञ्चिरासा
चकितनयनयोः पद्मजाद्यैर्हि दृष्टा ॥४६॥

विजितमजितमीशं देव्यकार्षीद् द्विकृत्वो
हरिकमलभवाद्यैरित्थमार्या प्रशस्ता ।
अमनुत चरितार्थां स्वामथो तान् प्रणम्य
पुनरपि समवापापूर्वशोभां महीध्रे ॥४७॥

फणिपतिरपि शैलं राजतं तं समाया-
त्फणिमणिशतकान्तं द्रष्टुमीशानमारात् ।
अपि सुररिपवस्ते रावणाद्याश्च भक्ता
अतिजवसहितैर्वा व्योमयानैः समीयुः ॥४८॥

तदनु दनुजशत्रुर्मित्रकोटिप्रकाशः
सह च भुवनमात्रा स्तोत्रघोषाभिगीतः ।
रजतशिखरशृङ्गारूढोऽभूत् सूर्यः
सुरपतिदिशि सार्धं छायया पूर्वशैलम् ॥४९॥

पुनरपि निजपीठे तिष्ठतीवाष्टमूर्तौ
प्रमथगणमुखैरेवोद्गतो हर्षघोषः ।
उदचलदथ पर्वनिहासि प्रासजन्सा
ह्युदधिजलनिनादः कर्णपीयूषकल्पः ॥५०॥

रुचिरकनककुम्भैराहृतैस्तीर्थतोयैः
श्रुतिनिनदविमिश्रैर्मण्डलं तापसानाम् ।
विरहनियमतापं लोकपित्रोरिवाथो
शमयितुमतिहर्षादभ्यषिञ्चद्यथेष्टम् ॥५१॥

भगवति सह देव्या चोपविष्टे स्वपीठे
ननृतुरमरलोकादागता वारयोषाः ।
जगुरुभयतलस्था गीतविद्याविधिज्ञा
निखिलभुवनमासीत्प्राज्यमानन्दमग्नम् ॥५२॥

विषमनयनपञ्चप्राणभूतं मनोज्ञं
प्रियतममपि देव्यास्ताण्डवं तत्प्रियार्थम् ।
भरतगुरुवरेण्येनोपदिष्टेन केचि-
त्स्वाभिनयविधिनैव प्रारभन्तातिरम्यम् ॥५३॥

सुरमुनिरपि शीघ्रं नारदः सप्ततन्त्रीं
सदसि महति तस्मिन् पाणियुग्मे निधाय ।
निजकरनखराग्रं तत्र सञ्चाल्य नूनं
श्रवणमधुरगीतं चोज्जगौ नाट्यमिश्रम् ॥५४॥

गणपतिरपि शुण्डादण्डमुध्दृत्य वेगा-
त्क्रमसहितलयज्ञस्ताडयामास भेरीम् ।
अमरविजयहेतुस्तारकारिः स धीमा-
नतनुत च मृदङ्गध्वानमाकम्प्रशीर्षः ॥५५॥

इदममृतनिदानं गीतमाधुर्यमाया-
द्ध्रुवमपि मनुजानां दातुमानन्दकन्दम् ।
जलधरपटलान्तर्यातनूत्नानिलोर्मि-
प्रचलनसमवाप्तस्वीयमार्गं विशेषम् ॥५६॥

सरसिजभवपत्नी कच्छपीं पाणिपद्मे
स्वररवमयदेहा श्वेतपद्मासनस्था ।
उदधितनुजयाथो दत्तालध्वनिश्च
व्यतनुत हि नवीनां काञ्चिदुल्लासगीतिम् ॥५७॥

विशति रजतशैले ताण्डवान्ते स्वगेहं
भगवति सहभार्ये हर्षपुष्टाननाब्जे ।
न्यपतदमलकान्तिः पुष्पवृष्टिः समन्तात्
स्फटिकमणिशताढ्या व्योमतो देवमुक्ता ॥५८॥

दिशतु परकृपालुर्मङ्गलं मानवानां
भवजलधिगतानां दुःखवातोद्धतानाम् ।
सुखमधिवसताच्च प्राणिवृन्दं समस्तं
यदयमखिलदाता ह्याशुतोषो महेशः ॥५९॥

किमिह भवति लोके दुर्लभं जन्मभाजां
हृदयतलगतं ये त्र्यम्बकं संस्तुवन्ति ।
निजपदमपि तेषां प्रीतियुक्तः स दत्ते
न हि न हि शिवपूजामन्यदस्तीह हित्वा ॥६०॥

चन्द्रार्धाञ्चितशेखरो विजयते संप्राप्तराज्यः पुनः
कैलासे कमनीयशृङ्गलसिते विभ्राजमानः श्रिया ।
पार्वत्या सहितस्तदीयविरहं निर्मूल्य हर्षान्वितः ।
कालेऽस्मिन् सकलः कलङ्करहितो लोकेषु संवर्धताम् ॥६१॥

॥ सर्वं श्रीसाम्बसदाशिवदिव्यचरणारविन्दार्पणमस्तु ॥

॥ इति श्रीनागराजविरचिते श्रीशबरीविलासे काव्ये श्रयङ्के ॥
॥ शबरीविजयो नाम षष्ठःसर्गः ॥
॥ समाप्तमिदं शबरीविलासं ॥
॥ नाम काव्यम् ॥

॥ मङ्गलम् ॥

श्रीः

॥ उपसंहारः ॥

नवरसपरिपूर्णा काव्यमाला नवीना
नवविधिभिरनूना गुम्फिता पद्यपुष्पैः ।
नवपरिमलयुक्ता स्वर्पिता लोकपित्रो-
र्वितरतु नितरां वो भूरिशो मङ्गलानि ॥१॥

काव्यं मनोज्ञं शबरीविलासं कृतं मया सज्जनतोषणाय ।
उमामहेशातिकृपाविलासं समेधतां लोकमुदे चिराय ॥२॥

जगत्पित्रोः पदाम्भोजे काव्यपुष्पं मनोहरम् ।
उमाविलासमुल्लासं शिवयोरिति विश्रुतम् ॥३॥

भक्त्या समर्प्य मोदेऽहं रचितं कृपया विभोः ।
स एव पातु मां दीनं पतितं पदपङ्कजे ॥४॥

यद्येतच्छिवयोर्विलासभरितं काव्यं नवीनं भवे-
त्सर्वेषां विदुषां सतां बहुमुदे लोकेऽद्य काले कलौ ।
वाग्देवीकरुणारसार्द्ररसनो वैदुष्यविद्युत्प्रभो
विश्वामित्रकुलोद्भवो विजयते श्रीनागराजः कविः ॥५॥

मङ्गलं पार्वतीशाय सज्जनानां च मङ्गलम् ।
मङ्गलं सर्वजन्तूनां सर्वलोकाय मङ्गलम् ॥६॥

॥ मङ्गलम् ॥

श्रीः

॥ श्रीविशालाक्षीस्तवः ॥

काञ्चीपतिप्रेमसुधाभिषिक्ते काशाङ्कुरस्वच्छशरीरकान्ते ।
कामप्रदे कामकलानिमग्ने काशीविशालाक्षि नमो नमस्ते ॥१॥

चन्द्रानने चन्द्रकलावतंसे चन्द्रानलार्कोपमवक्त्रशोभे ।
चन्द्रातपास्निग्धकपोलभासे काशीविशालाक्षि नमो नमस्ते ॥२॥

अव्याजकारुण्यरसाभिपूर्णे लोकैकमातर्ललिते शरण्ये ।
वाणीरमासेवितपार्श्वयुग्मे काशीविशालाक्षि नमो नमस्ते ॥३॥

मन्दारपुष्पग्रथितालकान्ते मन्दाकिनीवारिविहारशीले ।
वन्दारुवृन्दामरवृक्षवर्ये काशीविशालाक्षि नमो नमस्ते ॥४॥

भागीरथीतीरनिवासहृष्टे विश्वेश्वरप्रीतिपयःप्रदात्रि ।
विधात्रि धात्रीनुतपादपद्मे काशीविशालाक्षि नमो नमस्ते ॥५॥

कैलासशैलेश्वरशृङ्गवामे कैवल्यदात्रि त्रिपुरारिकान्ते ।
निरञ्जने निश्चलचित्तवृत्ते काशीविशालाक्षि नमो नमस्ते ॥६॥

भक्तस्तुतिप्रीतमनोऽभिराज्ये भक्तोत्तमाङ्गावृतदिव्यपादे ।
मुक्तिप्रदे मौक्तिकहारभूष्ये काशीविशालाक्षि नमो नमस्ते ॥७॥

ब्रह्माण्डभाण्डोदरि धर्मनिष्ठे नीलालकालंकृतशीर्षदेशे ।
नीलोत्पलाभेक्षणयुग्मदीप्ते काशीविशालाक्षि नमो नमस्ते ॥८॥

कामेश्वरालिङ्गनजातहर्षरोमाञ्चितात्मीयमनोहराङ्गि ।
वक्षोजभारावनताङ्गशोभे काशीविशालाक्षि नमो नमस्ते ॥९॥

सुराङ्गनाकोटिशिरःप्रदेशप्ररूढपुष्पोल्लसिताङ्घ्रिपीठे ।
प्रभावलिद्योतितकेशपाशे काशीविशालाक्षि नमो नमस्ते ॥१०॥

नृत्यप्रिये गानकलाविधिज्ञे विज्ञानबुद्धिप्रभवे महेशे ।
नित्योत्सवानन्दनिधिप्रमत्ते काशीविशालाक्षि नमो नमस्ते ॥११॥

सुवर्णवर्णे रणकर्मदक्षे विद्युत्प्रभे वीतभयादिदोषे ।
रक्षोविनाशाय च बद्धदीक्षे काशीविशालाक्षि नमो नमस्ते ॥१२॥

श्रीचन्दनालिप्तकुचान्तराले श्रीकण्ठवामाङ्कमहासनस्थे ।
श्रीराममन्त्रोच्चरणाभिरक्ते काशीविशालाक्षि नमो नमस्ते ॥१३॥

सिद्धाङ्गनागीतयशःप्रभावे वीणामृदङ्गध्वनिदत्तचित्ते ।
प्रदोषनाट्यप्रणयाभियुक्ते काशीविशालाक्षि नमो नमस्ते ॥१४॥

हुङ्कारनिर्भर्त्सितदैत्यसङ्घे रोषानलोद्दग्धविरोधिवृन्दे ।
कृपाम्बुनिर्मूलितलोकशोके काशीविशालाक्षि नमो नमस्ते ॥१५॥

अनाद्यनन्तेऽप्यचलप्रतिष्ठे अगेन्द्रकन्येऽप्यलिवर्णवेणि ।
अमोघशक्त्याधृतलोकभारे काशीविशालाक्षि नमो नमस्ते
॥१६॥

काञ्चीकरोल्लासितमध्यभागे क्वणन्मनोज्ञाभरणाभिभूष्ये ।
केयूरहारादिझणत्सुनादे काशीविशालाक्षि नमो नमस्ते
॥१७॥

कटाक्षनिर्धूतमहाघसङ्घे कुन्देन्दुदन्तास्मितचारुवक्त्रे ।
कल्याणि कल्याणशतप्रदात्रि काशीविशालाक्षि नमो नमस्ते
॥१८॥

शान्ते प्रशान्ताभिनिशान्तकान्ते शान्तात्मनामात्मविकासकर्त्रि
शान्तिप्रदे मङ्गलरूपिणीशे काशीविशालाक्षि नमो नमस्ते
॥१९॥

इन्द्रादिदिक्पालनुताङ्घ्रिपीठे इन्दीवराक्षि क्षितिपालपूज्ये ।
इन्दिन्दिरश्यामशिरोरुहान्ते काशीविशालाक्षि नमो नमस्ते
॥२०॥

कामान्धकारार्ककरस्वरूपे दुर्गेऽघदुर्गाद्रिपविक्षवज्रे ।
गङ्गासपत्नि प्रवरे वराङ्गि काशीविशालाक्षि नमो नमस्ते
॥२१॥

बाले बलिष्ठे भुवि भद्रकालि मायाविनि ह्रीमति भूतधात्रि ।
बीजाक्षरि ज्ञानमयस्वभावे काशीविशालाक्षि नमो नमस्ते
॥२२॥

सर्पाभवेणि प्रणतार्तिहन्त्रि पद्माभपाणि प्रणवस्वरूपे ।
ह्रीङ्कारवाणि प्रणयाभिपूर्णे काशीविशालाक्षि नमो नमस्ते
॥२३॥

भवानि मन्ये भवतापतप्तजनप्रमोदप्रदचन्द्रिकाभे ।
दिव्याम्बरे दीनजनाभिवन्द्ये काशीविशालाक्षि नमो नमस्ते
॥२४॥

कामाक्षि काञ्चीपुरवासतुष्टे मीनाक्षि पाण्ड्येन्द्रपुरीनिवासे ।
पद्माक्षि पद्मोद्भवगीतवृत्ते काशीविशालाक्षि नमो नमस्ते
॥२५॥

वेदान्तचर्चाविषयानुरक्ते रक्ताक्षि रक्षोधिपरक्तसिक्ते ।
रम्भादिवेश्यागणनाट्यतुष्टे काशीविशालाक्षि नमो नमस्ते
॥२६॥

चिदम्बरे चिन्मयि चिन्तनीये चिन्तान्तके चित्रविचित्रदेहे ।
चिरन्तनि क्षेमकराङ्कुरामे काशीविशालाक्षि नमो नमस्ते
॥२७॥

शिवे शिवार्धाङ्गसमेधिताङ्गि शिवप्रदे शैलसुते सुशीले ।
शैवार्पितप्रीतिसुमप्रपूज्ये काशीविशालाक्षि नमो नमस्ते
॥२८॥

लज्जावति श्रीमति वेदविद्ये लीलासमुद्रे लयवर्जिते च ।
लावण्यसिन्धो ललने लवाङ्गि काशीविशालाक्षि नमो नमस्ते
॥२९॥

ताम्बूलपूर्णामलनक्तबिम्बे सेनानिलम्बोदरवत्सलाम्ब ।
भवाम्बुधिस्नातजनावलम्बे काशीविशालाक्षि नमो नमस्ते
॥३०॥

कात्यायनि क्रान्तजगत्समस्ते मदालसे पाशशरादिहस्ते ।
गन्धर्वविद्याधरयक्षशस्ते काशीविशालाक्षि नमो नमस्ते
॥३१॥

सत्यव्रते सत्त्वरजस्तमाख्यगुणत्रयाधिष्ठितशक्तिसर्वे ।
चराचरात्मत्रिजगन्नियन्त्रि काशीविशालाक्षि नमो नमस्ते
॥३२॥

संराज्ञि राजेश्वरि राजपूज्ये राजीवनेत्रे त्रिदशैस्समीड्ये ।
राजत्प्रभाराजिकिरीटभूष्ये काशीविशालाक्षि नमो नमस्ते
॥३३॥

पतिव्रते पर्वतराजपुत्रि पतिव्रताभीष्टवरप्रदात्रि ।
पदापतत्पामरपालयित्रि काशीविशालाक्षि नमो नमस्ते
॥३४॥

क्षामोदरि क्षात्रगुणप्रदीप्ते क्षेमङ्करि क्ष्मासुरमोक्षदात्रि ।
क्षोणीजनक्षोभविनाशकर्त्रि काशीविशालाक्षि नमो नमस्ते
॥३५॥

सुवर्णशैलाभनितम्बबिम्बे बिम्बाधारे श्रीधरि शर्मदात्रि ।
भवाब्धिमज्जज्जनतारणोत्के काशीविशालाक्षि नमो नमस्ते
॥३६॥

परात्परे पावनि पादपद्मे देवि त्वदीये पतितं हि दीनम् ।
अधोमुखं दुःखदवाग्निदग्धं काशीविशालाक्षि भुवीह पाहि ॥३७॥

पुनः पुनस्ते पदपङ्कजेऽहं नतोत्तमाङ्गः प्रणमामि भक्त्या ।
कृपार्द्रदृष्ट्या परिपालयाम्ब काशीविशालाक्षि कृतागसं माम् ॥३८॥

त्रैलोक्यस्थितिकारिणीं भगवतीं भाग्यप्रदां निर्मलां
तत्वज्ञानमयीं शिवाङ्कनिलयां कैलासशैलस्थिताम् ।
नित्यां प्रत्यहमीडितां सुरवरैर्दारिद्र्यदुःखापहां
काशीपत्तनवासिनीं शुभकरीं वन्दे विशालेक्षणाम् ॥३९॥

अमुं स्तवं ये प्रपठन्ति मर्त्याः भक्त्या कृतं मातृपदारविन्दे ।
समर्पितं ते भुवि भूरिभाग्यं लब्ध्वा जगन्मातृकृपां लभन्ते ॥४०॥

श्रीः

॥ श्रीगंगायमुनयोः स्तुतिः ॥

(तीर्थयात्रापर्यटनसमये रचिता)

क्षेत्रे प्रयागे वरतीर्थराजे वेगागताभ्यां च सितासिताभ्याम् ।
परस्परालिङ्गनतत्पराभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥१॥

चलाचलाभ्यामचलात्मजाभ्यां तरङ्गमालापरिशोभिताभ्याम्
लोकस्य पापक्षयकारिणीभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥२॥

पुण्योदकाभ्यां पुलिनावृताभ्यां मज्जज्जनानन्दनिधिप्रदाभ्याम् ।
मुक्तिप्रदाभ्यां मुनिहर्षदाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३॥

वेणीप्रदानोत्सवतोषिताभ्यां वेणीवदन्योन्यविगुम्फिताभ्याम् ।
वेणीश्मानाथसुखङ्करीभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥४॥

मज्जत्सुरस्त्रीस्तनताडिताभ्यां स्नाताबलाकुङ्कुमपङ्किलाभ्याम् ।
शीतोदकाभ्यां शिवमोददाभ्यां नमोस्तु गङ्गायमुनानदीभ्याम्
॥५॥

रामालकास्नेहविमिश्रिताभ्यां चन्द्राननावाहुनिबन्धिताभ्याम् ।
मज्जन्नवोढानयनाम्बुजाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥६॥

सीमन्तिनीगण्डगलत्कस्तूरीमोदबिन्दुप्रमिश्राञ्जनकज्जलाभ्याम् ।
मुग्धाङ्गनासख्यसमेधिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥७॥

वधूकपोलाभिगलद्धरिद्रारजस्समूहेन च पिञ्जराभ्याम् ।
लाक्षारसोन्मिश्रणपिङ्गलाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥८॥

रम्भाघृताच्यादिसुराङ्गनानां रम्भानिभोरुद्वयशोभितानाम् ।
पानीयकेलिभ्रमरूषिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥९॥

मदालसानां वरवर्णिनीनां मुखाम्बुजाताहतनिर्झराभ्याम् ।
विपन्नगानां कुलिशायुधाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥१०॥

कल्याणवर्षोत्सुकवारिदाभ्यां नीलोत्पलश्रेणिविराजिताभ्याम् ।
सन्क्रान्तभास्वच्छशिबिम्बिकाभ्यां नमोऽस्तु गङ्गायमुना-
नदीभ्याम् ॥११॥

संसारतापोपशमक्रियाभ्यां समुद्रराजप्रियभामिनीभ्याम् ।
निर्धूतसापत्नविमत्सराभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥१२॥

एकयोपदेशक्रियया वृताभ्यामिवानिशं देशविदेशगाभ्याम् ।
अतन्द्रिताभ्यां सुरसन्नुताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥१३॥

मन्दानिलस्पर्शविनर्तिताभ्यां शीलोन्नताभ्यां शिवकिङ्करीभ्याम् ।
मन्दाकिनीसूर्यतनूद्भवाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥१४॥

मृत्युञ्जयाभ्यां मुदिताननाभ्यां कृषीवलाकृष्टनिजोदकाभ्याम् ।
वन्दारुमर्त्यामरपादपाभ्यां नमोऽस्तु गङ्गायमुनदीभ्याम्
॥१५॥

पुलिन्दनारीपरिपूजिताभ्यां दिवानिशं नौप्लवनोद्यताभ्याम् ।
भक्तस्तुताभ्यां भवतारकाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥१६॥

वाराणसीक्षेत्रनिवासिनीभ्यां रुद्राभिषेकोद्यमपूरिताभ्याम्
वेदस्तुताभ्यां वरमोक्षदाभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥१७॥

गन्धर्वविद्याधरकन्यकानां सहप्रियाणां प्रियकारिणीभ्याम् ।
गंगात्मभूरक्षणदीक्षिताभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥१८॥

क्षणे क्षणे लब्धयशस्विनीभ्यां दिने दिने दीनजनार्थिताभ्याम् ।
युगे युगे दर्शितवैभवाभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥१९॥

चकोरहंसादिविहंगमानां प्रारब्धसंगीतकलारतानाम् ।
शुभस्वरैर्गीतयशस्विनीभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥२०॥

पूजार्थमानीतसुगन्धवस्तुप्रसूनमालादिभिरर्चिताभ्याम् ।
भाग्यप्रदाभ्यां यमलांगनाभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥२१॥

सुवर्णभूभृत्तलपातिताभ्यां स्ववर्णशोभाततिदीपिताभ्याम् ।
यादस्सहस्राश्रितशम्बराभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥२२॥

संतर्पणार्थं पितृदेवतानां दत्तैः कुशाग्रैश्च तिलैर्युताभ्याम् ।
शुण्डाग्रसंपिष्टमृणालिनीभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥२३॥

स्नानार्थमायातमतंगजानां मदोदकस्रावकलाङ्किताभ्याम् ।
तेजस्विनीभ्यां तृषिताश्रिताभ्यां नमोऽस्तु गङ्गायमुना-
नदीभ्याम् ॥२४॥

चिरन्तनीभ्यां शिवसंगताभ्यां भयार्दितानामभयप्रदाभ्याम् ।
विश्वम्भराभ्यां करुणाम्बुधिभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥२५॥

अनर्गलाभ्यामतिविक्रमाभ्यां तापापनोदार्थमिवोद्गताभ्याम् ।
विचित्रगाभ्यां विधिपूजिताभ्यां नमोऽस्तु गङ्गायमुना-
नदीभ्याम् ॥२६॥

आवर्तसंभ्रान्तपयस्विनीभ्यां रत्नाञ्चितागाधतलावृताभ्याम् ।
लोकेश्वरीभ्यां शुचिसंयुताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥२७॥

मधौ मधुश्रीसमवैभवाभ्यां ग्रीष्मे यथेषच्च तपःकृशाभ्याम् ।
विजृम्भितप्रावृषि पूरिताभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥२८॥

वर्षात्यये निर्मलशम्बरेषु शरच्छशाङ्कप्रतिबिम्बिकाभ्याम् ।
ज्योतिर्मयीभ्यां विजिताम्बुधिभ्यां नमोऽस्तु गंगायमुना-
नदीभ्याम् ॥२९॥

हिमागमे हैमवतोदकाभ्यां शीतोदकाभ्यां शिशिरे महत्तौ ।
इत्थं सदा प्राप्तविवर्तनाभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥३०॥

विद्वज्जनाह्लादकराङ्कुराभ्यां कवीश्वरान्तःकरणस्तुताभ्याम् ।
महर्षिसन्ध्याञ्जलिसंस्थिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३१॥

विद्युत्प्रभाभ्यां विषयान्तकाभ्यां विज्ञानिबुद्धिभ्रमकारिणीभ्याम् ।
समस्तरोगप्रबलौषधाभ्यां नमोऽस्तु गंगायमुनानदीभ्याम्
॥३२॥

मण्डूकनक्राम्बुभुजंगमानां माणिक्यमुक्ताफलशङ्खकानाम् ।
शतैस्सहस्रैश्च समाश्रिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३३॥

तीरस्थदेवालयरञ्जिताभ्यां सशैवलाभ्यां सुजनार्चिताभ्याम् ।
सत्यव्रताभ्यामरिषूदनाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३४॥

सेतुप्रबद्धात्मपयोवतीभ्यां मनस्विनीभ्यां च विलासिनीभ्याम् ।
श्राद्धक्रियापिण्डविपूरिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३५॥

विरक्तिमार्गस्थितमानवानां सन्मार्गदाभ्यां समदर्शिनीभ्याम् ।
वैरिष्वपि प्रीतिपयःप्रदाभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३६॥

आचन्द्रतारार्कसाधिष्ठिताभ्यमायासशोकामयनाशिनीभ्याम् ।
आशालताच्छेदनकारिणीभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३७॥

वनस्पतीनामभिवृद्धिदाभ्यां वनाधिदेवीवरदायिनीभ्याम् ।
घोराटवीमध्यविचारिणीभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३८॥

घनस्वनाभ्यां घननीरदाभ्यां सरस्वतीसङ्गमनन्दिताभ्याम् ।
पुन्नागजातीकुसुमार्चिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥३९॥

तथाक्षयाश्वत्थतरोस्सुमूलैराधिष्ठितात्मीयतटावृताभ्याम् ।
लीलागतिभ्यां लयवर्जिताभ्यां नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥४०॥

लताश्रितानां वसुधारुहाणां शतैस्समन्तात्समधिष्ठिताभ्याम् ।
यथा सद्भिस्सुनिभिस्तपःस्थैः नमोऽस्तु गङ्गायमुनानदीभ्याम्
॥४१॥

दृष्ट्वा नदीयुग्ममनन्यचेतास्तस्मैस्सहस्रप्रणतीस्समर्प्य ।
लभे मनश्शान्तिमभूतपूर्वां गङ्गाप्रसादाद्यमुनावराच्च
॥४२॥

समागमे दिव्यनदीद्वयस्य मुहुर्मुहुर्मज्जनकर्मदक्षः ।
तृप्तिं तथाप्याक्षिमुदो न विन्दे प्रक्षालितान्तःकरणोऽपि पूतः
॥४३॥

भागीरथीसूर्यजयोर्जलौघे फेनावृते भूरितरङ्गयुक्ते ।
मदा सुराणामपि दुर्लभेऽहं ह्यपूर्वमानन्दचयं लभे च
॥४४॥

नमो नमो भारतपावनीभ्यां नमो नमस्सुन्दररूपिणीभ्याम्
नमो नमः पापविनाशिनीभ्यां नमोऽस्तु सन्मङ्गलदायिनीभ्याम्
॥४५॥

नमो नमश्शान्तिसुखप्रदाभ्यां नमो नमः पावनजीवनाभ्याम् ।
नमो नमः पण्डितपूजिताभ्यां नमोऽस्तु कल्याणसहस्रदाभ्याम्
॥४६॥

नमो नमश्चित्रविचित्रिणीभ्यां नमो नमश्चारुपयःप्रदाभ्याम् ।
नमो नमश्चन्दनशीतलाभ्यां नमोऽस्तु कैवल्यपदाङ्किताभ्याम्
॥४७॥

ये भक्तिभावेन पठन्ति नद्योः पवित्रयोः स्तोत्रमरं लभन्ते ।
ते दिव्यसिन्धुद्वयरम्यतीर्थे स्नानं महापापविनाशदक्षम्
॥४८॥

सरस्वती सत्वगुणस्वरूपा रजोगुणाढ्या सुरलोकसिन्धुः ।
तमस्स्वरूपा यमुना च लोके समागमः पुण्यतमो हि तासाम्
॥४९॥

नागराजरचिता नुतिरेषा शोकपापतमसां विनिहन्त्री ।
संसृतेर्भयहरी भुवि जीयाद्यावदर्कशशितारकमस्याम्
॥५०॥

श्रीः

शुद्धाशुद्धपत्रिका

Errata

पृष्ठम्	श्लोकः	पादः	अशुद्धम्	शुद्धम
३	२३	१	ब्रह्मविटां	ब्रह्मविदां
९	८४	१	प्रद्दिष्टः	प्रदिष्टः
१५	३८	१	त्रिपु ारिः	त्रिपुरारिः
२१	८९	२	गणे ाः	गणेशः
२६	१९	३	समारश्य	समारभ्य
२९	३२	३	प्रातेश्रुतं	प्रतिश्रुतं
३१	४३	१	निदर्शन	निदर्शनं
,,	,,	४	त्रि शूल	त्रिशूल
४०	८८	२	धरि	धीर
४९	५	४	श्रता	श्रुता
५४	३१	४	पञ्चमु वा	पञ्चमुखा
६७	६७	३	करोमि	करोमि
७०	१०	२	भुक्ति	मुक्ति
,,	१४	२	ग्रुग्म	युग्मं
,,	,,	,,	ञ्नि पी	ञ्निरपी
७२	२८	२	शुक	शुकं
७४	५३	२	लज्जाया	लज्जया
७५	५९	१	हृेदय	हृदये
,,	६२	१	नृत्यं	नृत्यं
७८	८९	१	प ति	पति
८१	२	२	भबान ी	भवानी
,,	,,	२	वक्तं	वक्तुं
८२	८	२	सञ्च न्ती	सञ्चरन्ती
८७	३३	४	स र्षम्	सहर्षम
९६	५०	२	रेबो	रेवो

(Contd. from cover page)

of the famous Panchamahakavyas. The latter-day artificialities as noted by Keith in his Sanskrit Literature have been very carefully avoided, but the excellences of our great classical writers like Bhasa, Kalidasa, Bharavi or Magha have been incorporated in a very successful manner. His genius or 'pratibha' is only matched by his 'vyutpatti' or literary equipment and his style is replete with the classical ideas he has imbibed in the correct Sastraic way. The last two cantos bear ample evidence to the way in which Kalidasa's Indumati-swayamvara and the next sarga of Isvara's marriage scene in the Kumarasambhava have been laid under ample contribution. The style is very simple and admirably suited to the context. Humour is not wanting as on the occasion when Subrahmanya greets his father with the remark that he with six heads is greater than his father with five heads or his grandfather, with four. Sanskrit Kavyas are very rich in lyrical effusions and in this poem also devotional lyrics, particularly those addressed to Ganga in the beautiful Vasanta-tilaka metre in Canto V. to Sri Rama by Ahalya in Canto XI in the Musical Malini metre, and the Dashaavatarastotra of Gautama, in that very canto are some places where the young author is at his best. The Ramayana is faithfully followed to a large extent : but in the context, where Ahalya is spoken of as having been changed into a stone in Canto XI, he seems to have yielded to popular tradition. Valmiki says Ahalya was invisible, repenting and fasting; Rama's genealogy, again, follows the Raghuvamsa order and not Valmiki's. Here he follows Bhasa and Kalidasa. In some places, out-of the way words have been used following Maga's path, but the author's judiciously keeping himself within proper bounds does not tax our patience. Four or five different metres have been

used in Cantos II, IV and XV, but here also, the changing of the metres has produced good effect. On page 50, in verse 99, instead of 'vachma', the form 'bruhma' would be better, and on page 130, the ungrammetical form 'aasa' could have been avoided. The young author deserves encouragement in every way. The printing leaves much to be desired and many mistakes not noticed in the Errata at the end are found.

U. Venkatakrishna Rao.

Book your copy now—as only a few copies are available.

Books by the same Author

PRICE
(Postage extra)

1. श्रीसीतास्वयंवरम् (महाकाव्यम्)
   Sree Seethaswayamvaram
   (A Mahakavya in 16 Cantos) ... 2 8 0

2. भारतीयदेशभक्तचरितम् (गद्यकाव्यम्)
   Bharateeya Desabhakta Charitam
   (A Prose Work in Sanskrit) ... 1 8 0

3. उन्मत्तकीचकम् (नाटकम्)
   Unmatta Keechakam (A Drama) ... In Press

4. स्तोत्रमुक्ताफलम
   (In Kannada Lipi) 0 8 0

For copies apply to—

Sahityalankara Kavibhushana
Sri K. S. Nagarajan, B.Sc.,
No. 11, Wilson Gardens,
BANGALORE -2